संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला – 7

In Public domain. Digitization Muthulakshmi Research Academy

वेङ्कटाध्वरिकृतम्

श्रीराघवयादवीयम्

(अनुलोम-विलोमकाव्यम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्यः के नीलकण्ठम्

निदेशकः

सहसम्पादकौ परियोजना-अनुसन्धातारौ च

डा वि सुब्रह्मण्यम्, उपनिदेशकः

डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2021

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला – 7

वेङ्कटाध्वरिकृतम्

श्रीराघवयादवीयम्

(अनुलोम-विलोमकाव्यम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2021

In Public domain. Digitization Muthulakshmi Research Academy

Rāghavayādavīyam
(Anulomavilomakāvyam)

This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Smt. Bhagyalakshmi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Rāghavayādavīyam

ISBN – 978-93-80171-57-9

© Sanskrit Academy

Year : 2021
Copies : 500
Pages : xvii+100
Price : Rs 200
$ 20

Sanskrit Academy Shashtyabda Granthamala - 7

In Public domain: Digitization Muthulakshmi Research Academy

Anuloma-Vilomakāvyam

Śrī Rāghavayādavīyam

of

Veṅkaṭādhvari

(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Central Sanskrit University)

Chief Editor

Prof K Neelakantham

Director

Associate Editors and Project Investigators

Dr. V. Subrahmanyam, Deputy Director

Dr. Joshi Santosh Kumar, Research Assistant

Sanskrit Academy

Adarsha Shodha Sansthan

(Recognised by Central Sanskrit University, New Delhi)

Osmania University Campus, Hyderabad – 500 007

2021

In Public domain. Digitization Muthulakshmi Research Academy

Rāghavayādavīyam
(Anulomavilomakāvyam)
This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Smt. Bhagyalakshmi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Rāghavayādavīyam

ISBN – 978-93-80171-57-9

© Sanskrit Academy

Year	:	2021
Copies	:	500
Pages	:	xvii+100
Price	:	Rs 200
		$ 20

In Public domain. Digitization Muthulakshmi Research Academy

ओम्
श्री गुरुभ्यो नमः
॥ श्री शङ्करभगवत्पादाः विजयन्ते ॥

Preface

Sanskrit Academy feels very happy to bring out an exceptional poem in Sanskrit titled "*Raaghava-Yaadaveeyam*", an *anuloma-viloma kavya* composed by Sri Venkatadhvari of 17th century A. D. This Kavya consists of thirty verses and deals with the stories of Sri Rama and Sri Krishna together by adopting the style of *anuloma* and *viloma* i.e. reading each *sloka* in regular and also in reverse order. Here each *sloka* when read in *anuloma* form narrates the story of Sri Rama and tells the story of Sri Krishna when read in the reverse order. Therefore, one can say that this work actually contains sixty *slokas* in all.

If epic Ramayana of sage Valmiki was the base for the story of Sri Rama, Venkatadhvari's Sri Krishna in this work was the inspiration drawn from poems like Parijatapaharanam which in turn had roots in Vedavyasa's Mahabhagavatam.

The style of *Raghava-Yadaveeyam* is a little difficult to comprehend and that was the reason the poet himself came up with a commentary in simple Sanskrit. He had quoted references from *Amarakosha* and others to strengthen his ideas for explaining the method of *Anuloma-Viloma.*

According to the two *slokas*[1] in the beginning of *Vishwagunadarsha Champu* written by Venkatadhvari, the

---

1 काञ्चीमण्डलमण्डनस्य मखिनः कर्नाटभूभृद्गुरो-
स्तातार्यस्य दिगन्तकान्तयशसो यं भागिनेयं विदुः।
अस्तोकाध्वरकर्तुरप्पयगुरोरस्यैव विद्वन्मणिः
पुत्रः श्रीरघुनाथदीक्षितकविःपूर्णो गुणैरेधते।।

In Public domain. Digitization Muthulakshmi Research Academy

reader gets to know that he was the son of Raghunatha and his grandfather was Srinivasa also known as Appayaguru who was the nephew of the great scholar Tatacharya. It is said that this Appayaguru is different from the famous Advaita philosopher Appya Dikshitar, the author of many works on various Shastras. Sri Venkatadhvari was born at *Arasanipalai* near Kancheepuram and lived between 1590-1660 A. D. He was the follower of Sri Vedanta Desika. He was well versed in the Shastras like *Tarka, Vedanta, Tantra, Vyakarana and Sahitya.* He had composed 14 works, the most important of them being *Vishwagunadarshchampu Lakshmisahasram* etc. According to the history, Venkatadhvari lost his eye-sight after composing *Vishwagunadarshachampu* for the censure he made on the world around him and miraculously regained after composing *Lakshmisahasram* and *Srinivasasahasram.* Sri Venkatadhvari was called as Sri Venkatacharya Deekshitar first and later as Aparadeshikan when he wrote Lakshmisahsram imitating the Padukasahasram of Sri Vedantadeshika. But he became famous as Venkatadhvari since he offered the fruit of all the sacrifices performed by him to Lord Venkateshvara. Among the many works of Sri Venkatadhvari only a few were published. *Acharyapanchashat, Sravananandam, Yadava-Raghaveeyam, Subhashitakaustubham, Vishwagunadarshchampu, Varadabhyaudayachampu, LakshmiSahasram, SrinivasaSahasram, Uttarachampu, Pradyumnanandanatakam, Sringaradipika, Subhadraparinaya* are some of them.

Raghava-Yadaveeyam was first published in 1966 with Sanskrit commentary by poet himself and with English translation by Sri Ayachitam Panduranga Rao. This was edited and published by Sri K Srinivasachari. Later it was published on www.sadagopan.org with English translation by Dr. Saroja

---

तत्सुतस्तर्कवेदान्ततन्त्रव्याकृतिचिन्तकः।
व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरिः॥

In Public domain. Digitization Muthulakshmi Research Academy

Ramanujam. Apart from these, many scholars have uploaded this book in Telugu, Devanagari, Tamil and Kannada scripts on various web-sites. The present work is our endeavor in bringing out the marvelous poem with English and Telugu translations. I have taken the English translation of Sri Ayachitam Panduranga Rao and have added my Telugu translation to it.

I appreciate the efforts of Dr.V. Subrahmanyam, Deputy Director and Dr. Santosh Kumar Joshi research assistant who are working hard for bringing out many books under this project. Here particularly Santosh kumar joshi tried well for this book Raghava-Yadaveeyam and made thorough study on it. I thank Dr. Varalakshmi another deputy director and Sri V. Suryaprakash research assistant in the Academy.

I greatly think of the encouragement and support of honorable Vice-chancellor Prof. Subbarayudu sir and Registrar Prof. Subrahmanya Sharma, Central Sanskrit University, New Delhi (formerly Rashtriya Sanskrit Sansthan). I thank honorable Vice-chancellor Prof. D. Ravinder, Osmania University for his motivation in the research and publications of Sanskrit Academy.

I thank Smt. Bhagyalakshmi for the DTP work and Karshak Art Printers, Vidyanagar Hyderabad for bringing out this book beautifully on time.

Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

राघवयादवीयविलासः

अत्यन्तगभीरं विशालं संस्कृतवाङ्मयं प्रकाशते भाषासाहित्येषु सर्वेषु मूर्धन्यस्थाने। वाङ्मयेऽस्मिन् नैकशास्त्रविषयाः नैकविधप्रक्रियासु राराजन्ते। तासु प्रक्रियास्वन्यतमा सर्वेषाम् आह्लादकारिणी भवति काव्यप्रक्रिया। काव्यं तावत् पद्य-गद्य-चम्पू-शास्त्र-सन्धान-यमक-चित्रादिभेदेन बहुविधं वाङ्मये दृश्यते। एषु काव्येषु सन्धान-यमक-चित्रकाव्यप्रकाराः शब्दालङ्काराधारिताः भवन्ति। श्लेषनिर्वहणकुशलाः कवयः एका, द्वे, तिस्रः, चतस्रः, पञ्च, षट्, सप्त पर्यन्तं कथाः स्वीकृत्य काव्यानि अरचयन्।

कालिदासादीनां मूर्धन्यानां कवीनां काव्येषु शब्दालङ्काराधारितानां प्रकाराणां वर्णनमवलोकयितुं शक्नुमः। भारवि-माघादिमहाकवीनां समये तावत् एतादृशानां यमक-चित्रबन्ध-अनुलोम-प्रतिलोमादिरचनायाः प्राधान्यम् अधिकमभवत्। स्वयम् एतौ कवी स्वकाव्येषु एतादृशश्लोकानां रचनमकुरताम्।

एतादृशानाम् अनुलोमविलोमकाव्यानां स्वरूपं साहित्ये बहुषु ग्रन्थेषु दृश्यते। दण्डिमहाकविः स्वकाव्यादर्शे प्रतिलोमक्रमम् इत्थं व्यावृणोत्।

आवृत्ति प्रातिलोम्येन पादार्धश्लोकगोचरा।
यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम्।। - काव्यादर्शः 3-73

प्रतिलोमं पादगतप्रतिलोमं, श्लोकार्धप्रतिलोमं, श्लोकप्रतिलोमम् इति त्रिप्रकारकः भवतीति ज्ञायते। ते च प्रकारभेदाः एवं सन्ति।

पादप्रतिलोमम्

1. नानाजाववजानाना सा जनौघघनौजसा।
   परानिहहाऽहानिराप तान्वियाततयाऽन्विता।।

- शिशुपालवधम् 19-40

In Public domain. Digitization Muthulakshmi Research Academy

2. राधा साररसाधारा मारमाऽर रमारमा।
काशोदाररदाऽशोका सा ललास सलालसा।।
- अलङ्कारकौस्तुभम् 7-50

3. साराभाशु शुभारासा सारताममतारसा।
यान्यानघघनन्याया सा मताततततामसा।। - हरविजयम् 43-23

4. वारिशालिनासवातिवासनालिशारिवा
सारभाविनीलमाभ्रमालिनी विभा रसा।
सालतालकाननामुना न का लतालसा
राजिता श्रिया परा दुरापया श्रिताजिरा।। - हरविजयम् 5-140

5. सेवावाशिशिवावासे केशकाननकाशके।
सेध्यावाच्यच्च्यवाध्यासे केस्थइताजिजितस्थिते।।
- कप्फिणाभ्युदयम् 18-55

6. लालोना गगनालोला धूरिता ननतारिधूः।
स्रविकाननकाविस्रा दारिताननतारिदाः।। - चित्रबन्धरामायणम् 1-36

7. कालीनाऽऽननालीका राधिता हि हिताऽधिरा।
या मा सा मम सामाया कापि दीपप्रदीपिका।। - लक्ष्मीसहस्रम् 22-9

8. मारासुध्नाविपक्षादरवरवरदक्षापविघ्ना सुरामा
सामासक्ता रणत्रा रिपुरसुरपुरि त्राणरक्तासमा सा।
शापाकृष्टामृदुस्वा बत सरस तव स्वादुमृष्टा कृपासा
नामा सत्या कृतज्ञा तनुरजतनुज्ञातकृत्या समाना।। - श्वरशतकम् 50

श्लोकार्धप्रतिलोमम्

1. यामाताश कृतायासा सा याता कृशता मया।
रमणारकता तेऽस्तु स्तुतेताकरणामर।। काव्यादर्शः 3-74

In Public domain. Digitization Muthulakshmi Research Academy

2. वेत्राशाककुजे शैलेऽलेशैजेऽकुकुशात्रवे।
   यात किं विदिशो जेतुं तुंजेशो दिवि किंतया।।

   - किरातार्जुनीयम् 15-18

3. वारणागगभीरा सा साराऽभीगगणारवा।
   कारितारिवधा सेना नासेधा वरितारिका।। - शिशुपालवधम् 19-44
4. रामपादगता भासा साभातागदपामरा।
   कादुपानञ्जकासवब्या ह्यास काञ्चनपादपका।। - पादुकासहस्रम् 919
5. यानसेवनहासिन्या न्यासिहानवसेनया।
   वानतो हितभीमास्तमाभीतहितो नवा।। - कप्फिणाभ्युदयम् 18-50
6. मारसारसमाकारा राकामा सरसा रमा।
   सा गता हसना तेन न तेनाहसहतागसा।। - धर्मशर्माभ्युदयम् 18-11

श्लोकप्रतिलोमम्

1. (अ) निशितासिरतोऽभीको न्येजतेऽमरणा रुचा।
   सारतो न विरोधी नः स्वाभासो भरवानुत।।
   (प्र) तनुवारभासो भास्वानधीरोविनतोरसा।
   चारुणा रमते जन्ये कोऽभीतो रसिताशिनि।।

   - किरातार्जुनीयम् 15-22,23

2. (अ) वाहनाजनि मानासे साराजावनमा ततः।
   मत्तसारगराजेभे भारीहावज्जनिध्वनि।।
   (प्र) निध्वनज्जवहारीभा भेजे राजरसात्तमः।
   ततमानवजारासा सेना मानिजनाहवा।। - शिशुपालवधम् 19-33,34
3. (अ) सारससौख्य समेता ख्याता पदपा भुवि स्वाज्ञा।
   साहसकार्यवनाशा धीरा वसुदा नवन्यासा।।

In Public domain. Digitization Muthulakshmi Research Academy

(प्र) सान्यावनदा सुवराऽधीशाना वर्यका सहसा।

ज्ञा स्वा विभुपादपताख्याता मे सख्यसौ सरसा।।

- पादुकासहस्रम् 947,948

4. (अ) भासनाचरणप्राया नायाता यशसा मता।

राजराजिररोधाः समायादानसलालासा।

(प्र) सा ललास नदायामा सधारोरजिराजिरा।

तामसाशयतायाना या प्राणा रचना सभा।।

- कप्फिणाभ्युदयम् 18-52,53

5. (अ) नयानयानयानयानयानया।।

नयानयानयानयानयानयानयानया।।

(प्र) यान यान यान यान यान यान यान यान।

यान यान यान यान यान यान यान यान।। - यादवाभ्युदयम् 6-98

एवम्प्रकारेण साहित्ये विभिन्नकाव्येषु विभिन्नप्रक्रियाः आधारीकृत्य रचिताः काव्यविशेषाः तत्र तत्र दृश्यन्ते। ततः सन्धानकाव्यानां, यमककाव्यानां, चित्रकाव्यानाञ्च रचनं स्वतन्त्रतया अभवत्। तस्यां परम्परायां नैकानि काव्यानि ईदृशानि लभ्यन्ते। सन्धानकाव्येषु राघवपाण्डवीयम्, यादवराघवीयम्, राघवयादवीयम् इत्यादीनि काव्यानि बहूनि लभ्यन्ते।

यादवराघवीयम्

रामकृष्णयोः कथां स्वीकृत्य श्री अरिसिनपल्लि वेङ्कटाध्वरिमहकविना विरचितं काव्यं "राघवयादवीयम्" इति नाम्ना सुप्रसिद्धम्। काव्येऽस्मिन् अनुलोमपाठत्वेन रघुवंशसम्भूतस्य श्रीरामस्य, यादववंशोद्धारकस्य श्रीकृष्णस्य च कथोपनिबन्धनात् काव्यस्यास्य

In Public domain. Digitization Muthulakshmi Research Academy

"राघवयादवीयम्" इति नाम रक्षितम्। अस्मिन् काव्ये अनुलोमपाठे श्रीरामचरितं, प्रतिलोमपाठे श्रीकृष्णस्य चरितं पारिजातापहरणवृत्तान्तमात्रमुपवर्णितम्। अनुलोमवाचनेन रामकथोपनिबद्धाः त्रिंशत् श्लोकाः, प्रतिलोमपाठेन कृष्णकथावर्णनपराः त्रिंशत् श्लोकाः आहत्य षष्टिश्लोकाः अत्र विद्यन्ते। काव्यान्ते कविविषयवर्णनपरौ द्वौ श्लोकौ -

श्रीमद्राघवयादवाकृतिधरश्शेषाचलोत्तंसकः
श्रेयोहेतुमचीकरत्कृतिमिमां श्रीशो मया दुष्कराम्।
तस्मादत्र पवित्रमाधवकथास्वादोन्मिषत्कौतुकः
सन्तस्साधु वितन्वतां गुणविदः श्लाघ्याममोघादराः।।
रघुनाथसूनुचरितानुवर्णिनी रघुनाथसूरिचरितानुवर्णितः।
इह वेङ्कटार्यकविना सटीकया सहितो समाप्तिमहिताधया।।

अनुलोमविधिना कथाभागः

(1) मङ्गलश्लोकः, (2,3) अयोध्यापुरवर्णनम्, (4) रामवर्णनम्, (5) श्रीरामकृतविश्वामित्रयज्ञसंरक्षणम्, (6) श्रीसीतारामविवाहः, (7) परशुरामस्य रामेण विजयः, (8) अयोध्यायां सीतया सह श्रीरामविहारः, (9) कैकेयी स्व पुत्राय भरताय दशरथात् राज्यग्रहणम्, (10) रामपट्टाभिषेकविघटनं, काननप्राप्तिः (11) पितृभक्त्या रामस्य वनगमनम्, (12) सीतायाः रामभद्रेण सह वनप्राप्तिः, (13) भरद्वाजादिसेवनम्, (14) चित्रकूटप्राप्तिः, (15) श्रीरामस्य दण्डकावनप्राप्तिः, (16) विराधहननं,अगस्त्यप्राप्तिः, (17) जटायुसेवनं, (18) शूर्पणखा नासिकाछेदः, (19) खरवधम्, (20) रामे लङ्केश्वरस्य विजिगीषाहङ्कारप्रतिपादनम्, (21) मारीचवधः, (22) सीतापहरणम्, (23) श्रीरामस्य सीतावियोगः, हनुमत्समागमः, सुग्रीवशरणागतिः, (24) वालिवधः, (25) रामस्य सुग्रीवसेनालाभेन तेजःप्राप्तिः, (26) सागर मुल्लङ्घ्य सीतादर्शनपूर्वकं समायात हनुमत्समागमः

In Public domain. Digitization Muthulakshmi Research Academy

सागरवेलाप्राप्ती च, (27) सेतुमार्गेण सागरतरणम्, (28) रावणवधः, सीताप्राप्तिः विभीषणराज्यप्रदानञ्च, (29) श्रीरामस्यायोध्याप्राप्तिः, (30) श्रीरामस्य राज्यप्राप्तिः।

प्रतिलोमविधिना कथाभागः

(1) मङ्गलश्लोकः, (2-3) द्वारकापुरवर्णनम्, (4) कृष्णवर्णनम्, (5) नारदस्य कृष्णप्राप्तिः, (6) रुक्मिण्याः पारिजातकुसुमलाभः, (7) तत्कुसुमेन रुक्मिण्याः शोभातिशयलाभः, (8) रुक्मिण्याः कृष्णेन सह स्वगेहप्राप्तिः, (9) रुक्मिणीपारिजातार्पणात् सत्यभामायाः कोपप्राप्तिः, (10) सत्यभामायाः कोपातिशयः, (11) श्रीकृष्णस्य सत्यभामामन्दिरागमनम्, (12) कोपातिशयेन सत्यभामया कृष्णस्य नावलोकनम्, (13) सत्यभामप्रसन्नभाषणम्, (14) श्री कृष्णस्य स्वर्गगमनम्, (15) नन्दनवनप्राप्तिः, (16) इन्द्रस्य भयभञ्जनम्, (17) पारिजातोत्पाटनम्, श्रीकृष्णं प्रति इन्द्रस्य युद्धाभिगमनम्, (18) शक्रकृष्णसम्भाषणम्, (19) दिव्यपारिजातस्य भूतलनयनानौचित्यनिवेदनम्, (20) शोकक्रान्तः इन्द्रः ततः धैर्येण जयन्तादीन् युद्धाय प्रेषणम्, (21) इन्द्रपराभवः, (22) शक्रेण प्रद्युम्नतेजोभङ्गः, (23) प्रद्युम्नेन शत्रुहननात् कीर्त्यवाप्तिः, (24) गरुडसंरक्षणम्, (25) श्रीकृष्णस्य जयलक्ष्मीसिद्धिः, (26) पारिजातग्रहणम्, (27) श्रीकृष्णभक्तानां जयः, तद्विमुखानां भीतिः, (28) श्रीकृष्णस्य भूलोकागमनम्, (29) श्रीकृष्णस्य पारिजातेन सह द्वारकाप्राप्तिः, (30) सत्यभामायाः पारिजातप्राप्तिः। (इयञ्च कथाभागः अस्माभिः दत्त नूतनश्लोकसंख्याधारेण प्रस्तुतः)

काव्यव्याख्यानविशेषाः

काव्यस्यास्य व्याख्यापि वेङ्कटाध्वरिणैव रचितेति काव्यान्तगद्यद्वारा अभिज्ञायते। तदेवं वर्तते "इति श्रीमद्वादिहंसाचार्यावतंसवाजपेयसर्व-

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिष्ठाप्तोर्यामादियाजिश्रीनिवासतनूभवस्य श्लेषयमकचक्रवर्तिनः रघुनाथाचार्ययज्वनः तनयेन काञ्चीनगरवास्तव्येन श्रीवेङ्कटाचार्य यज्वना विरचितं राघवयादवीयचरितं सव्यख्यानं सम्पूर्णम्"। इति

व्याख्याने कविः शब्दप्रामाण्यनिरूपणावसरे विभिन्नकोशानामेवं पाणिनिसूत्राणाम् इतरग्रन्थप्रामाण्यञ्च प्रादर्शयत्। शब्दप्रमाणनिरूपणप्रसङ्गे विभिन्नकोशग्रन्थान् अदर्शयत्। ते च ग्रन्थाः नैघण्टुकाः(1) हलायुधः(3,4) अमरकोशः(10) विश्वः (5,6,7,8,11) रत्नमाला (10,11) एवमेव अन्येषां ग्रन्थकर्तॄणाञ्च प्रमाणान्यपि प्रादर्शयत् प्रथमश्लोकस्य "मारामोराः" इत्यस्य शब्दव्याख्याने "समस्तलोकविजयश्रीपूर्यमाणोरसम्" मुरारिप्रयोगः (2) इति मुरारिप्रयोगं प्रमाणत्वेनादर्शयत्।

काव्येऽस्मिन् कविना श्लोकाः अनुष्टप् छन्दसि ग्रथिताः। सप्तमाष्टमश्लोकौ जगतीछन्दसि स्रग्विणीवृत्ते वर्तेते। दशमश्लोके "अत्र योधोत्साहजनकत्वगानकर्तृत्वादिविशेषणैः नारद इति व्यज्यते अत एव पर्यायोक्त्यलङ्कारः "इति एकत्रैव अलङ्कारप्रसङ्गःविहितः कविना।

एवं श्लेषयमकचक्रवर्तिना वेङ्कटाध्वरिणा अद्भुतम् अनुलोम-प्रतिलोमकाव्यं राघवयादवीयम् साहितीरसिकानां विलक्षणप्रक्रिया-विशेषचमत्कारजनितानन्दानुभवकुतूहलानां सानुमोदं मोदं जनयतीति शम्।

धन्यवादसमर्पणम् –

इयं परियोजना केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। परियोजनायाः अस्याः आवाम् अनुसन्धाताराविति आत्मानं धन्यौ मन्यावहे। ईदृगवसरं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विन्दावहे।

In Public domain. Digitization Muthulakshmi Research Academy

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यः नमोवाकान् वितरावः। उस्मानिया–विश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयावः। अमूल्यां कृतिमिमां परिचयाय सहकृतवद्भ्यः सर्वेभ्यः कृतज्ञतां समर्पयावः। संस्कृतपरिषदः सहकारिसदस्येभ्यः धन्यवादान् विदद्वः।

इत्थं बुधजनविधेयौ परियोजना अनुसन्धाता–उपानुसन्धातारौ

डा.विरिवेण्टि सुब्रह्मण्यम्, उपनिदेशकः

डा.जोशी सन्तोषकुमारः, शोधसहायकः

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

वेङ्कटाध्वरिकृतम्

श्रीराघवयादवीयम्

(अनुलोम-विलोमकाव्यम्)

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरामजयम्

अथ श्रीराघवयादवीयम्

।।अ।। वन्देऽहं देवं तं श्रीतं रन्तारं कालं भासा यः ।
रामो रामाधीराप्यागो लीलामारायोध्ये वासे ।। 1 ।।

पदच्छेदः

वन्दे अहं देवं तं श्रीतं रन्तारं कालं भासा यः ।
रामः रामाधीः आप्यागः लीलां आर आयोध्ये वासे ।।

रामाधीः रामायां स्त्रियां सीतायां धीः बुद्धिः यस्य स तथोक्तः सन् । **आप्यागः** आप्तुं योग्याः अगाः सह्यमलयादिपर्वताः यस्य स तथोक्तः । सीतायां मनः प्रणिधाय सह्यमलयादिगिरीन् गतवान् इति भावः । एवंविधः यः रामः **आयोध्ये** अयोध्याभवे **वासे** गृहे लीलां क्रीडां **आर** प्राप्तवानिति भावः । "ऋ गतौ" इत्यस्माल्लिट् । रावणवधं कृत्वा अयोध्यायां स्वगेहमेत्य सीतया साकं चिक्रीडेत्यर्थः । **भासा** कान्त्या **कालं** रन्तारं क्रीडितारं इति यावत् । श्रिया इतं प्राप्तं **श्रीतं** " गोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिति कथ्यते " इति नैघण्टुकाः । **तं** देवम् **अहं** वन्दे प्रणमामीत्यर्थः ।।

In Public domain. Digitization Muthulakshmi Research Academy

శ్రీరామచంద్రమూర్తి సీతాసమేతుడై రావణ వధానంతరం సహ్యా-మలయాది పర్వతముల మీదుగా పయనిస్తూ అయోధ్యా నగరమునకు చేరుకొనెను. తర్వాత పట్టాభిషిక్తుడై సీతమ్మతో కూడ చిరకాలపర్యంతం అయోధ్యను పరిపాలించెను. అట్టి సీతారామచంద్రులకు నమస్కరిస్తున్నాను.

I pay my obeisance to Lord Sri Rama, who with his heart pining for Sita, travelled across the Sahyadri Hills and returned to Ayodhya after killing Ravana and sported with his consort, Sita, in Ayodhya for a long time.

अयमेव श्लोकः प्रातिलोम्येन पठ्यते ---

।।प्र।। सेवाध्येयो रामालाली गोप्याराधी मारामोराः ।
यस्साभालङ्कारं तारं तं श्रीतं वन्देऽहं देवम् ।। 1 ।।

पदच्छेदः

सेवाध्येयः रामालाली गोप्याराधी मारामोराः ।
यः साभालङ्कारं तारं तं श्रीतं वन्दे अहं देवम् ।।

मारामोराः मायाः लक्ष्म्याः आरामभूतं भोग्यस्थानभूतं उरः वक्षः यस्य स तथोक्तः। अत एव " समस्तलोक विजयश्री-पूर्यमाणोरसम् " इति मुरारिप्रयोगः। **सेवाध्येयः** सेवादिभिः

In Public domain. Digitization Muthulakshmi Research Academy

तपो-यज्ञादिभिः ध्येयः ध्यातुं योग्यः। **रामालाली** रामाः रुक्मिण्यादिकाः अष्टौ महिष्यः ताः लालयतीति तथोक्तः **यः** कृष्णः **गोप्याराधी** गोप्यः राधाप्रभृतयः गोपाङ्गनाः आराधयति सम्मानयति गोप्याराधी अभूदिति शेषः। अनेन कृष्णस्य दक्षिणत्वमुक्तं भवति। **साभालङ्कारं** साभाः सदीप्तिकाः अलङ्काराः कौस्तुभादिभूषणानि यस्य स तथोक्तः। **तं श्रीतं** पूर्ववदर्थः। तं **देवं** वासुदेवम् **अहं तारं** यथा भवति तथा उच्चस्वरेणेति यावत्। **वन्दे** स्तौमि। वदि स्तुत्यभिवादनयोः इत्यस्मात् लडुत्तमैकवचनम्।।

లక్ష్మీదేవికి ఆవాసయోగ్యమైన వక్షఃస్థలము కలవాడు, తపోయజ్ఞాదులతో మాత్రమే సేవింపదగినవాడు, రుక్మిణ్యాది అష్టభార్యలను లాలించేవాడు. రాధా మొదలగు గోపికలను ఆరాధించేవాడు, కౌస్తుభాది మణులచే అలంకృతుడూ అయిన శ్రీకృష్ణునికి నమస్కరించుచున్నాను.

I bow to Lord Sri Krisha, whose chest is the sporting resort of Sri Lakshmi ; who is fit to be contemplated through penance and sacrifice, who fondless Rukmani and his other consorts and who is worshipped by the Gopikas, and who is decked with jewels radiating splendour.

In Public domain. Digitization Muthulakshmi Research Academy

अथ आनुलोम्यप्रातिलोम्याभ्यां अयोध्यापुर-द्वारकापुर-वर्णनपरं श्लोकमारचयति ---

॥अ॥ साकेताख्या ज्यायामासीद्याविप्रादीप्तार्याधारा ।
पूराजीतादेवाद्याविश्वासाग्र्यासावाशारावा ॥ 2 ॥

पदच्छेदः

साकेताख्या ज्यायां आसीत् या विप्रादीप्ता आर्याधारा ।
पूः आजीता अदेवाद्याविश्वासा अग्र्या सावाशारावा ॥

अजस्य अपत्यम् आजिः दशरथः तेन इता प्राप्ता **आजीता** । **अदेवाद्याविश्वासा** देवाद्याः देवगन्धर्वदानवाद्याः तेषाम् अविश्वासः देवाद्याविश्वासः तद्रहिता अदेवाद्याविश्वासा । देवादयः इमां पुरीम् उप-रुन्ध्युरिति अविश्वासः तस्याः कदापि नास्तीति भावः । देवादीनामपि दुस्साध्येति भावः । **अग्र्या** अग्रभवा अयोध्यामथुरामायेत्यादि सप्तपुरीषु मध्ये प्रथमगणितेति यावत् । श्रेष्ठेति वा अर्थः । **सावाशारावा** सवं यज्ञं अश्नन्तीति सवाशाः क्रतुभुजः, तत्सम्बन्धी सावाशः आरावः कोलाहलः यस्याः सा तथोक्ता । तस्यां क्रतूनाम् अनुष्ठीयमानतया तदीयहविर्जिघृक्षया समागतदेवकोलाहलशालिनी सेत्यर्थः । "यज्ञः सवोऽध्वरो यागः" इत्यमरः । आर्याः वैश्याः आधाराः अपेक्षितवस्तुप्रदानेन आश्रयभूताः यस्याः सा तथोक्ता । "स्यादार्यः स्वामिवैश्ययोः"

In Public domain. Digitization Muthulakshmi Research Academy

इति अनुशासनम् । एवंविधा साकेताख्या साकेतमिति नामवती पूः पुरी अयोध्यापुरी ''स्यात्साकेतमयोध्यायां'' इत्यमरः । ज्यायां भूम्यां ''क्षोणीज्याकाश्यपी क्षितिः'' इत्यमरः ।
आसीत् अभूत् । या पूः विप्रैः ब्राह्मणैः आदीप्ता आ समन्तात् प्रकाशिता सा पूः आसीदित्यन्वयः ॥

భూలోకమున 'సాకేత' మను మరోపేరుగల అయోధ్యా నగరముండెను. దేవతలకు దానవులకు కూడ ఆక్రమించుటకు వీలుకాని దృఢమైన సైన్యము కలది. నిరంతరం యజ్ఞయాగాది క్రతువులాచరించుచున్న విప్రోత్తముల వేదమంత్రములతో పవిత్రమైనది, వైశ్యులచేత ఉత్తమమైన వ్యాపారాదులు కలదియూ అయిన ఆ అయోధ్యానగరమును అజుని కుమారుడైన దశరథుడు పరిపాలించుచుండెను.

On the earth was the city Ayodhya, named otherwise as Saketa, foremost among the famous cities, was the place of abode of King Dasaratha, son of King Aja, which city was invincible even by the Gods,which displayed the pageantry of the Gods, who had assembled to partake the oblations offered in the sarifices conducted there, which city was shining with all splendour with the Brahmins and merchant community.

In Public domain. Digitization Muthulakshmi Research Academy

अयमेव श्लोकः प्रातिलोम्येन पठ्यते --

।।प्र।। वाराशावासाग्र्या साश्वाविद्यावादेताजीरापूः ।
राधार्याप्ता दीप्राविद्यासीमायाज्याख्याताकेसा ।।2।।

पदच्छेदः

वाराशौ आस अग्र्या साश्वा विद्यावादेताजीरा पूः ।
राधार्याप्ता दीप्रा विद्यासीमा या ज्याख्याता के सा ।।

अग्र्या उत्तमा '' पुरी द्वारवती चैव '' इति द्वारकाया अन्त्यत्वात् । साश्वा अश्वासहिता अश्वशब्दो गजादीनामुपलक्षकः । **विद्यावादेषु** तर्कादिविद्याप्रसङ्गेषु **इताजयः** प्राप्तयुद्धाः पण्डिताः तेषाम् इरा भूमिः स्थानमिति यावत् । ''इरावारिसुराभूम्यां भारतीषु निगद्यते'' इति हलायुधः । राधार्याप्ता राधायाः आर्यः राधार्यः राधास्वामी राधाभर्ता कृष्णः तम् आप्ता प्राप्ता । **दीप्रा** प्रकाशमाना **विद्यासीमा** विद्यानां दहरविद्यादि ब्रह्मविद्यानां सीमा सिद्धिक्षेत्रभूता, सर्वधा भगवत्सन्निधानादिति भावः । एवंविधा **या पूः** द्वारकापुरी **ज्याख्याता** भूमौ प्रसिद्धा सा **वाराशौ** जलराशौ **के** जले **आस** बभूव ।।

నగరములలోకెల్ల ఉత్తమమైనది, గజాశ్వాదులతో పరివ్యాప్తమైనది, నిరంతరం వివిధశాస్త్రపండితులతో

In Public domain. Digitization Muthulakshmi Research Academy

అలంకరింపబడినది, రాధాప్రియుడైన శ్రీకృష్ణపరమాత్మనే నాయకుడుగా కలది, దహరాది బ్రహ్మవిద్యల అభ్యాసమునకు స్థానమైనట్టిదీ అయిన ద్వారవతీ నగరము జలరాశిమధ్యలో ప్రకాశిస్తుండెను.

The city Dwaravathi, noteworthy among the cities, was in the midst of water, that city which abounded in horses and elephants, which was the battle ground of the debating erudite scholars, which city had as her master, Sri Krishna, whose consort was Radha and which city was the greatest of the seats of learning.

अनयोरेव पुर्योः आनुलोम्यप्रातिलोम्याभ्यां वर्णयितारं श्लोकम् आरचयति --

।।अ।। कामभास्स्थलसारश्रीसौधासौघनवापिका ।
सारसारवपीनासरागाकारसुभूरिभूः ।। 3 ।।

पदच्छेदः

कामभास्स्थलसारश्रीसौधा असौ घनवापिका ।
सारसारवपीना सरागाकारसुभूरिभूः ।।

कामस्य भाः मन्मथस्य तेजः तस्य **स्थलभूताः** स्थानभूताः मन्मथोद्दीपिका इति यावत् । सारश्रियः वरेण्यसम्पदः

In Public domain. Digitization Muthulakshmi Research Academy

सौधाः यस्यां सा तथोक्ता । **घनवापिका** निबिडवापिका । **सारसारवपीना** सारसानां पक्षिविशेषाणाम् आरवैः शब्दैः पीना अधिका असौ साकेताख्या पुरी **सरागाकारसुभूरिभूः** सरागः सरक्तिमा आकारः येषां तानि सरागाकाराणि रक्तवर्णानि सुभूरीणि शोभनवर्णानि तेषां भूः स्थानभूता । ''भूरिप्राज्यसुवर्णयोः'' ''भूः पृथ्व्यां स्थानमात्रे'' इति विश्वः । सरागाकाराः सुभूरिभुवः यस्याः सा तथोक्तेति वा अर्थः ॥

విశేషమైన సంపదలతో, ఉన్నతమైన సౌధములతో, లోతైన బావులతో, సారసపక్షుల కలకలారావములతో మఱియు ఆత్మీయతానురాగములు కలిగిన జనులతో అయోధ్యానగరము వర్ధిల్లుచుండెను.

The city of Ayodhya abounded in huge mansions, which were the repository of immense wealth and splendour, deep wells and the cooing sounds of the Sarasa birds. The city was full of people, who were filled with a deep sense of love and affection.

अयमेव श्लोकः प्रातिलोम्येन पठ्यते --

॥प्र॥ भूरिभूसुरकागारासनापीवरसारसा ।
कापिवानघसौधासौ श्रीरसालस्थभामका ॥ 3 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पदच्छेदः

भूरिभूसुरकागारासना पीवरसारसा ।

का अपि वा अनघसौधा असौ श्रीरसालस्थभामका ॥

भूरिभूसुरकानि बहुब्राह्मणकानि **अगारासनानि** गृहवेदिकाः यस्यां सा तथोक्ता । गृहवेदिकापङ्क्तिः बहुब्राह्मणेत्यर्थः । **पीवराणि** स्थूलानि **सारसानि** पद्मानि यस्यां सा तथोक्ता । ''सारसः पक्षिभेदे स्यात् सारसं सरसीरुहम्'' इति विश्वः । **अनघसौधा** निर्दोषप्रासादा । वाशब्दः समुच्चये । अनघसौधा चेत्यर्थः । ''वा स्याद्विकल्पोपमयो - रेवार्थे च समुच्चये '' इत्यभिधानात् । **काऽपि** अनिर्वाच्या **असौ** द्वारकापुरी **श्रीरसालस्थभामका** श्रीमत्सु रसालेषु सहकारेषु तिष्ठतीति श्रीरसालस्थः । भामः सूर्यः स एव भामकः यस्यां सा तथोक्ता । रसालाग्रस्थसूर्य इत्यनेन रसालानाम् अत्यौन्नत्यं भवति । अत एव सम्बन्धातिशयोक्तिरलङ्कारः । ''भामः क्रोधे रवौ दीप्तौ'' इति विश्वः ॥

విప్రులతో నిండిన వేదికలతో, నిర్దుష్టములైన వైభవోపేతములైన భవనముల పంక్తులతో, సుదీర్ఘములైన కమలములతో, రసాలవృక్షపు పంక్తులతో, అనిర్వర్ణనీయమైన శోభతో ద్వారకాపురి ప్రకాశించుచుండెను.

In Public domain. Digitization Muthulakshmi Research Academy

The raised pials in the houses of Dwaraka were filled with Brahmins. There were many huge lotuses and impeccable mansions. The city 'Dwaraka' which was indescribable, was in the midst of mango groves.

एवं पुरद्वयं वर्णयित्वा तन्नायकौ रामकृष्णौ आनुलोम्यप्रातिलोम्याभ्यां प्रतिपादयितुं पद्यं रचयति --

।।अ।। रामधामसमानेनमागोरोधनमासताम् ।
नामहामक्षररसं ताराभास्तु न वेद या ॥ 4 ॥

पदच्छेदः

रामधाम समानेनम् आगोरोधनम् आस ताम् ।
नामहाम् अक्षररसं ताराभाः तु न वेद या ॥

या पुरी **ताराभाः** नक्षत्रकान्त्यः **न वेद** न जानाति । तारा- शब्दः सूर्यादिरुपलक्षणार्थः । सूर्यचन्द्रनक्षत्रादीन् रश्मीन् उपवनसौधादिनिबिडतया न जानातीत्यर्थः । **ताम्** अयोध्यापुरीं **नामहाम्** अमहः अनुत्संवः न विद्यते यस्यां सा नामहा । नैकधेत्यादाविव प्रतिषेधार्थनकारसमासः । अतः न नलोपः । सर्वदा महोत्सवशालिनीमित्यर्थः। **अक्षररसं** नित्यानन्दम् । आगोरोधनं पापनिवारकं । ''आगः पापापराधयोः'' इति विश्वः । **समानेनं** समानः सदृशः इनः सूर्यः यस्य तत् तथोक्तम् । सूर्यसदृशमित्यर्थः । **रामधाम** रामाख्यं धाम तेजः आस तां पुरीम् आददे परिजग्राहेत्यर्थः ॥

In Public domain. Digitization Muthulakshmi Research Academy

ఎత్తైన సౌధములతో, మహెూన్నతములైన వృక్షములతో పరివ్యాప్తమైయున్న ఆ అయోధ్యా నగరమున ప్రజలు సూర్యచంద్రుల మఱియు నక్షత్రములయొక్క కాంతిని చూడలేకపోయిరి. తమ నగరమున నివసించే ప్రజలందరి పాపములను హరించివేయు అయోధ్యానగరమున ప్రతిదివసమూ ఉత్సవప్రాయముగా ఉండేడిది. అటువంటి అయోధ్యయందు సూర్యునికాంతితో సమానమైన కాంతిగల శ్రీరామచంద్రుని తేజస్సు సర్వత్ర వ్యాపించెను.

Ayodhya, interspersed with clusters of trees and mansions, had not seen the light of stars. It was full of festivities and joy. It warded off all sins. In its splendour, it equalled the Sun. The majestic lustre in the form of Rama pervaded its whole atmosphere.

इदमेव पद्यं प्रातिलोम्येन पठ्यते --

।।प्र।। यादवेनस्तुभारातासंररक्षमहामनाः ।

तां समानधरोगोमाननेमासमधामराः ।। 4 ।।

पदच्छेदः

यादवेनः तु भाराता संररक्ष महामनाः ।

तां सः मानधरः गोमान् अनेमासमधामराः ।।

नेमः अवधिः न विद्यते ययोः ते **अनेमे असमे** निरुपमे

In Public domain. Digitization Muthulakshmi Research Academy

धामरायौ तेजस्सम्पदौ यस्य सः **अनेमासमधामराः** निरवधिकनिस्सीमतेजस्सम्पद्युक्त इत्यर्थः । "नेमः कालेऽवधौ गर्ते प्रकारे कैतवेऽपि चे" ति विश्वः । **गोमान्** गोस्वामी तु गोमानित्युक्तेः । गोपाल इति यावत् । **मानधरः** मानी महामनाः उदारचेताः **भाराता** भासां दीप्तीनां राता दाता । रा दान इत्यस्मात् तृचि रूपम् । **सः** प्रसिद्धः **यादवेनः** यादवानाम् इनः प्रभुः श्रीकृष्णः "इनस्सूर्ये प्रभौ चन्द्र" इत्युक्तेः । स **तु तां** द्वारकापुरीं **संररक्ष** पालयामास । "रक्ष पालन" इत्यस्मात् सम्पूर्वात् लिट् ॥

ఉదారమైన మనస్సు కలవాడు, యాదవకులమంతటికిని ప్రభువైనవాడు, అత్యంత కాంతిమంతుడు, గోపాలకుడు, నిరవధికమైన తేజస్సంపన్నుడు అయిన శ్రీకృష్ణపరమాత్మ ఆ ద్వారకాపురిని రక్షించుచుండెను.

The liberal hearted Sri Krishna, the lord of the Yadavas, the source of all light, the Lord of cows, the repository of unbounded splendour, was the protector of Dwaraka.

अथ विश्वामित्रागमनं रामकृततद्यज्ञरक्षणं च आनुलोम्येन प्रतिपादयन्तं, प्रातिलोम्येन च नारदस्य कृष्णप्राप्तिप्रतिपादकं श्लोकं ग्रथ्नाति --

In Public domain. Digitization Muthulakshmi Research Academy

॥अ॥ यन् गाधेयो योगी रागी वैताने सौम्ये सौख्येसौ ।
तं ख्यातं शीतं स्फीतं भीमानामाश्रीहाता त्रातम्
॥ 5 ॥

पदच्छेदः

यन् गाधेयः योगी रागी वैताने सौम्ये सौख्ये असौ ।
तं ख्यातं शीतं स्फीतं भीमान् आम अश्रीहाता त्रातम् ॥

सौम्ये सुन्दरे **वैताने** वितानः यज्ञः तत्सम्बन्धिनि **सौख्ये** सुखे, **रागी** इच्छावान् । अतिसुन्दरयज्ञजन्यसुखेच्छावानित्यर्थः । अत एव **अश्रीहाता** श्रीः वेदः "सा हि श्रीरमृता सताम्" इति श्रुतेः । तद्विरोधिनः अश्रियः अवैदिकाः तेषां हाता वर्जयिता **भीमान्** भययुक्तः । राक्षसाः आगत्य स्वयज्ञविघ्नं करिष्यन्तीति भीतिमानित्यर्थः । एवंविधः **गाधेयः योगी** विश्वामित्रमुनिः स्फीतम् अभिवृद्धं **शीतम्** अनुग्रं **ख्यातं** कीर्तिमन्तं **तं** श्रीरामचन्द्रं **यन्** प्राप्नुवन् सन् । "इण् गतौ" इत्यस्मात् शतरि रूपम् । असौ गाधिपुत्रः **त्रातं** भावे क्तः । त्राणं प्रकृतत्वात् त्राणं यज्ञरक्षणं आम प्राप्तवान् । "आम गत्यादिषु" इत्यस्मात् लिट् । यज्ञं चिकीर्षन् विश्वामित्रः श्रीरामं प्राप्य स्वयज्ञरक्षणं प्राप्तवानिति भावः ॥

In Public domain. Digitization Muthulakshmi Research Academy

గాధిసూనుడైన విశ్వామిత్రుడు అవైదికులైన అసురులు తాను ఆచరిస్తున్న యజ్ఞయాగాదులకు విఘ్నము కలిగించుట చూసి, ధర్మాత్ముడు, పరాక్రమవంతుడూ అయిన శ్రీరామచంద్రునే యజ్ఞరక్షకుడిగా పొందెను.

The great Sage Viswamitra, son of Gadhi, desirous of unfettered performance of sacrifices, secured the aid of the protector of sacrifices (viz: the calm and famous Sri Rama) from the destructive elements.

प्रातिलोम्येन तु एवं पाठः --

।।प्र।। तं त्राताहाश्रीमानामाभीतं स्फीतं शीतं ख्यातम् ।
सौख्ये सौम्येसौ नेता वै गीरागीयो योधेगायन् ।।5।।

पदच्छेदः

तं त्राता हा श्रीमान् आम अभीतं स्फीतं शीतं ख्यातम् ।
सौख्ये सौम्ये असौ नेता वै गीरागी यः योधे गायन् ।।

सौम्ये जातावेकवचनम् । सौम्येषु विप्रेषु । "सौम्यः पुमान् बुधे विप्रे त्रिषु स्यात् सोमदैवते । रम्ये अनुग्रहे चे" ति रत्नमाला । तेषु मध्ये **नेता** नायकः । ब्राह्मणेषु उत्तम इत्यर्थः । **योधे** योद्धरि । "भटा योधाश्च योद्धारः" इत्यमरः । तस्मिन् **अभीतम्** अभीतिं भावे क्तः । **त्राता** रक्षिता । योद्धृनिष्ठस्य

In Public domain. Digitization Muthulakshmi Research Academy

भयाभावस्य धैर्यातिशयोत्पादनेन संरक्षक इत्यर्थः । **श्रीमान्** शोभावान् ब्रह्मवर्चसीति यावत् । **यः** मुनिः । **गीरागी** गिरां वाचां रागाः गान्धारादिस्वराः अस्य सन्तीति गीरागी । ''रागोनुरागे मात्सर्ये लाक्षादौ रक्तिमत्विषोः । गान्धारादौ रञ्जने च'' इति रत्नमाला । **असौ** नारदः **गायन्** गानं कुर्वन् **शीतं** दयाशीतलं **ख्यातं** प्रसिद्धं सौख्ये **स्फीतं** जगतः सुखार्थं अभिवृद्धम् । **सौख्ये** इति निमित्ते सप्तमी । चर्मणि द्वीपिनं हन्तीतिवत् । **तं** श्रीकृष्णम् **आम** प्राप्तवान् । **हेति** सत्यभामाकोपमूलमिदं नारदागमनमिति खेदं सूचयति । **वै** शब्दः पादपूरणे । ''वै स्यात् सम्बोधने पादपूरणेऽनुनयेऽपि च'' इति (रत्नमाला) विश्वः । यद्वा सौम्ये नेतावै नेतृत्वेन प्रसिद्ध इत्यर्थः । ''वै सम्बुद्धावनुनये तथारम्भप्रसिद्धयोः'' इति रत्नमाला । अत्र योधोत्साहजनकत्व-गानकर्तृत्वादि विशेषणैः नारद इति व्यज्यते । अत एव पर्यायोक्तमलङ्कारः ॥

విప్రశ్రేష్ఠుడు, సుమధురగానలోలుడు, పరమభక్తుడు అయిన నారదమహర్షి ధర్మనిష్ఠులైన వీరులకు వారి భయమును పోగొట్టి ధైర్యము కల్పించువాడు, దయాపరుడు, లోకరక్షకుడు అయిన శ్రీకృష్ణపరమాత్మ వద్దకు వెళ్ళెను.

The famous sage Narada, the greatest among the

In Public domain. Digitization Muthulakshmi Research Academy

Brahmins, and who instils and sense of courage among the warriors and who is a great musician approaches singing, Sri Krishna, who is born for the welfare of the mankind and the world.

अथ आनुलोम्येन सीतायाः रामप्राप्तिप्रतिपादकं, प्रातिलोम्येन रुक्मिण्याः पारिजातकुसुमलाभप्रतिपादकं च पद्यं निबध्नाति --

।।अ।। मारमं सुकुमाराभं रसाजापनृताश्रितम् ।
काविरामदलापागोसमावामतरानते ।। 6 ।।

पदच्छेदः

मारमं सुकुमाराभं रसाजा आप नृताश्रितम् ।
काविरामदलापा गोसमा अवामतरा नते ।।

कस्य सुखस्य अविरामः अविच्छेदः तं ददातीति **काविरामदः** । लापः अभिलापः यस्याः सा **काविरामदलापा** । अविच्छिन्नानन्दप्रदसूक्तिकेत्यर्थः । ''कं शिरोम्बुसुखेऽपि च'' इति रत्नमाला । कं ब्रह्म खं ब्रह्मेति च श्रुतिः । **गोसमा** क्षमायाः भूमेः मातुस्समा । अत एव नते प्रणतजने **अवामतरा** सुतराम् अकुटिला **रसाजा** भूमिजा सीता ''रसाविश्वम्भरास्थिरे'' त्यमरः । **सुकुमाराभं** कोमलप्रभं **नृतां** नरभावम् **आश्रितं मा रमं**

In Public domain. Digitization Muthulakshmi Research Academy

लक्ष्मीकान्तं "मः शिवे मा रमायां स्यात्" इति विश्वः । "रमः कान्तो रमा लक्ष्म्यां" इति रत्नमाला । **आप** प्राप्तवती । अनेन वैदेहीरघुवीरयोः विवाहोत्सवः प्रदर्शितः ।

అవిచ్ఛన్నమైన మృదుమధుర భాషణమునకు మారుపేరు, ఓర్పులో పృథివితో సమానురాలు, నుతజనులయందు అపారమైన దయాపరురాలు, మఱియు భూదేవత పుత్రికయైన సీతాదేవి నీలమేఘశ్యాముడైన శ్రీరామచంద్రుని భర్తగా పొందెను.

Sita, whose words are a source of immense joy, who is equal to Mother Earth, who is compassionate to those who bow before her, who was born out of the earth, obtained (married) Sri Rama, who was possessing a graceful splendour and was the consort of Lakshmi, and had taken the human form.

प्रातिलोम्येन चैवमस्य पाठः --

।।प्र।। तेन रातमवामास गोपालादमराविका ।
तं श्रितानृपजासारभं रामाकुसुमं रमा ।। 6 ।।

पदच्छेदः

तेन रातम् अवामा आस गोपालात् अमराविका ।
तं श्रिता नृपजा सारभं रामा कुसुमं रमा ।।

In Public domain. Digitization Muthulakshmi Research Academy

रमा लक्ष्मीरेव **नृपजा** सती राज्ञः जाता सती **तं** श्रीकृष्णं **श्रिता** प्राप्ता । **अमराविका** अमराणाम् अविका रक्षिका । अव रक्षण इत्यस्मात् ण्वुल् । **अवामा** कौटिल्यरहिता **रामा** वधूः रुक्मिणीति यावत् । ''राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि'' इति स्मर्यते । **तेन** नारदेन **रातं** दत्तम् । रा दान इत्यस्मात् कर्मणि क्तः । **साराभं** सारा मुख्या भा कान्तिः यस्य तत् । ''भाश्च विद्युति दीप्तयः'' इत्यमरः । **कुसुमं** पारिजातपुष्पं **गोपालात्** कृष्णात् **आस** गृहीतवतीत्यर्थः ।।

సాక్షాత్తు శ్రీలక్ష్మీదేవియే భీష్మకుడనే రాజుకు కూతురై రుక్మిణిగా జన్మించి శ్రీకృష్ణుని వివాహమాడెను. ఆటు తర్వాత సకల జనావళిని రక్షించు శక్తిగలది, మృదువైన స్వభావముగలది అయిన ఆ జగన్మాత (రుక్మిణీదేవి) నారదునిచే తీసుకురాబడిన పారిజాతపుష్పమును శ్రీకృష్ణుని ద్వారా పొందెను.

Lakshmi, born as the daughter of the king, was married to Sri Krishna. Rukmani (Goddess Lakshmi in the human form), who is the protector of the Gods, and who is free from all faults and the bride of Sri Krishna, took the resplendent flower Parijatha from Sri Krishna, given by the Sage Narada.

अथ आनुलोम्येन रामो जामदग्न्यं जित्वा तस्मिन् आनते सति दयां कृतवान् । एतम् अर्थं प्रदर्शयन्तं, प्रातिलोम्येन च भौमेषु कुसुमेषु कृतानादरा रुक्मिणीधृतेन पारिजातकुसुमेन

In Public domain. Digitization Muthulakshmi Research Academy

शोभातिशयं प्राप्य नवैव जातेति प्रत्याययन्तं श्लोकम् आरचयति –

।।अ।। रामनामा सदा खेदभावे दया-
वानतापीनतेजारिपावानते ।
कादिमोदासहातास्वभासारसा-
मेसुगोरेणुकागात्रजे भूरुमे ॥ 7 ॥

पदच्छेदः

रामानामा सदा खेदभावे दयावान्
अतापी इनतेजाः रिपौ आनते ।
कादिमोदासहाता स्वभासा रसामे
सुगः रेणुकागात्रजे भूरुमे ।।

कादिमोदासहाता कं जलम् अदन्तीति कादिनः अब्भक्षाः मुनयः तेषां मोदम् अस्यन्ति तिरस्यन्तीति कादिमोदासाः महर्षिहर्षनिरासकाः राक्षसाः तेषां हाता वर्जयिता निराकर्तेति यावत् । खेदः भावे यस्य सः खेदभावः **खेदभावे** खिन्नमनस्के **सदा दयावान्** कृपाशाली **इनतेजाः** सूर्यप्रकाशः तथापि **सुगः** सुप्रापः **रामनामा** भगवान् **भूरुमे** भुवः उरुः अधिकः मा लक्ष्मीः यस्य सः भूरुमः पृथिवीसम्पन्नविपुलश्रीकः इत्यर्थः । **रसामे** रसाम् अमति गच्छतीति रसामः भुवं त्यक्त्वापि तां पुनः प्राप्तवतीत्यर्थः । **रिपौ** शत्रुभूते **रेणुकागात्रजे** रेणुकापुत्रे जामदग्न्ये रामे **आनते**

In Public domain. Digitization Muthulakshmi Research Academy

प्रणते सति **स्वभासा** स्वतेजसा **अतापी** अतापनः बभूवेत्यर्थः ॥

జలమే ఆహారముగా స్వీకరించె మునులను బాధపెట్టే రాక్షసులను నియంత్రించువాడు, ఖిన్నులైనవారియందు దయగలవాడు, సూర్యునితో సమానమైన కాంతి కలవాడు, లక్ష్మీ సనాథుడు అయిన శ్రీరాముడు శత్రువుగా వచ్చిన రేణుకా పుత్రుడైన పరశురామునికి నమస్కరించగా ఆతను శాంతించెను.

Sri Rama, who was glowing with a lustre like that of the Sun, but at the same time was easily approachable, who always sympathised with the woebegotten, who vanquished the demons harassing the sages, who was endowed with all the wealth, became kind- hearted when Parasurama, son of Renuka, bowed before him.

प्रातिलोम्येन त्वेवं पाठः ---

॥प्र॥ मेरुभूजेत्रगाकाणुरेगोसुमे -
सारसा भास्वताहासदामोदिका ।
तेन वा पारिजातेन पीता नवा
यादवे भादखेदासमानामरा ॥ 7 ॥

पदच्छेदः

मेरुभूजेत्रगा काणुरे गोसुमे सा
अरसा भास्वता हा सदामोदिका ।

In Public domain. Digitization Muthulakshmi Research Academy

तेन वा पारिजातेन पीता नवा
यादवे अभात् अखेदा समानामरा ॥

मेरुभूजेत्रगा मेरुप्रदेशजेता अगः रैवताख्यः पर्वतः यस्याः सा तथोक्ता । सुमेरुसमे रैवतके हि नारदेनागत्य रुक्मिण्या सह स्थिताय कृष्णाय पारिजातकुसुमं दत्तमिति पुराणप्रसिद्धिः । कस्य सुखस्य अणुः काणुः सुखलेशः तं राति ददातीति **काणुरं** सुखलेशप्रदं तस्मिन् । "लवलेशतृणाणवः" इत्यमरः । रातेः "आतोऽनुपसर्गे कः"। **गोसुमे** भूमिजन्ये पुष्पे **अरसा** रसः रागः तद्रहिता अरसा । दिव्यकुसुमलाभेन भौमकुसुमेषु निःस्पृहेति भावः । **सदामोदिका** सततम् आमोदिका सन्तोषयित्री समानामरा पारिजातलाभादमरसदृशीत्यर्थः । **अखेदा** दुःखरहिता **भास्वता** तेजस्विना **तेन पारिजातेन** कृष्णदत्तेन पारिजातकुसुमेन **पीता** गौरवर्णा **सा** रुक्मिणी **नवेव** नूतनेव शोभातिशयेन नवदेहं प्राप्तेव **यादवे** श्रीकृष्णे **अभात्** प्रचकाशे । अत्र वाशब्दः इवार्थः । "इववद्वायथाशब्दौ" इति दण्डी । हा इत्याश्चर्ये । पारिजातकुसुमेन शोभातिशयं प्राप्य रुक्मिणी कृष्णसमीपे गृहीतमानुषदेहापि दिव्यशरीरं प्राप्तेव बभौ इति भावः ॥

మేరుపర్వతతుల్యమైన రైవతకపర్వతము వద్ద రుక్మిణీ కృష్ణులున్నప్పుడు నారదమహర్షి తెచ్చిన పారిజాతపుష్పమును

In Public domain. Digitization Muthulakshmi Research Academy

శ్రీకృష్ణుడు రుక్మిణీదేవికిచ్చెను. పారిజాతపుష్పపు కాంతిచేత శోభాతిశయముతో ప్రకాశించిన రుక్మిణీదేవి దాని సుగంధముతో పరవశురాలై సాధారణపుష్పములందు ఆసక్తి కోల్పోయెను.

Rukmani had lost all flair for the flowers growing on the earth, which produced a faint pleasure. Rukmani, with that Parijatha flower obtained while on the Raivathaka mountain, was glowing with a new lustre in the company of Sri Krishna, as if she had assumed a new body.

अथ रामः साकेतं प्राप्य स्वगेहेषु सीतया साकम् अरमतेत्येवं आनुलोम्येन प्रतिपादयन्तं, प्रातिलोम्येन कृष्णदत्तपारिजातभूषिता रुक्मिणी कृष्णेन सह स्वगेहं प्रापेत्येवमर्थं प्रत्याययन्तं श्लोकमाह-

।।अ।। सारसासमधाताक्षिभूम्नाधामसु सीतया ।
साध्वसाविहरेमेक्षेम्यरमासुरसारहा ।। 8 ।।

पदच्छेदः

सारसासमधाता अक्षिभूम्ना धामसु सीतया ।
साधु असौ इह रेमे क्षेमी अरम् आसुरसारहा ।।

अरं शीघ्रम् आसुरम् असुरसम्बन्धिनं सारं बलं हन्तीति **आसुरसारहा क्षेमी** कुशलवान् **अक्षिभूम्ना** नेत्रमहिम्ना **सारसासमधाता** असमशब्दः भावप्रधानः असमत्वम् असाधुत्वम् ।

In Public domain. Digitization Muthulakshmi Research Academy

''समा स्त्रीवत्सरे साधु सर्वतुल्येषु त्रिष्वपी'' ति रत्नमाला । सारसेषु पद्मेषु असमत्वस्य असाधुत्वस्य धाता पोषकः पद्मासाधुत्वावहनयनप्रभावः इत्यर्थः । **असौ** श्रीरामः **इह** अयोध्यायां **धामसु** गृहेषु **सीतया** जानक्या सह **साधु** सम्यक् **रेमे** रमते स्म ॥

అతివేగముగా అసురుల బలమును హరించివేసినవాడు, కుశలుడు, పద్మనేత్రుడు అయిన శ్రీరామచంద్రుడు సీతాదేవితో కూడ అయోధ్యాధామములందు చక్కగా విహరించెను.

Sri Rama, who quickly sapped the energy of Asuras (demons), who was the abode of safety, sported with Sita in the abodes in Ayodhya.

प्रातिलोम्येन पाठस्तु एवम् ---

॥प्र॥ हारसारसुमारम्यक्षेमेरेहविसाध्वसा ।
यातसीसुमधाम्नाभूक्षिताधामससारसा ॥ 8 ॥

पदच्छेदः

हारसारसुमा रम्यक्षेमेरा इह विसाध्वसा ।
या अतसीसुमधाम्ना भूक्षिता धाम ससार सा ॥

हार इव मुक्तावलिरिव सारं श्रेष्ठं सुमं पारिजातकुसुमं यस्यास्सा **हारसारसुमा रम्यस्य** मनोज्ञस्य **क्षेमस्य** कल्याणस्य

In Public domain. Digitization Muthulakshmi Research Academy

इरा भूमिः स्थानमिति यावत्। **या** रुक्मिणी **इह** जगति **विसाध्वसा** भयरहिता सपत्नीभ्यः सत्यभामादिभ्यः अपि नाबिभ्यदित्यर्थः। **सा** रुक्मिणी **अतसीसुमधाम्ना** अतसीपुष्पदीप्तिना **भूक्षिता** पृथिवीक्षिता राज्ञा कृष्णेन सह **धाम** गृहं **ससार** अगमत् । सृ गताावित्यस्माल्लिट् । ''धाम जन्मप्रभास्थान प्रभाव सुखसद्मस्वि'' ति रत्नमाला ॥

ముత్యాలహారమును బోలిన పారిజాతపుష్పమును ధరించిన లోకకల్యాణకారకురాలు, సత్యభామాది సపత్నులనుండి భయము లేనిదీ అయిన రుక్మిణీదేవి అతసీపుష్పసంకాశముతో ప్రకాశిస్తున్న శ్రీకృష్ణునితో తన భవనమున ప్రవేశించెను.

Rukmani who possessed the Parijatha flower, which was like a necklace of pearls, and a repository of all welfare, and who was not afraid of her co-wives, reached her abode with Sri Krishna.

अथ कुपितया कैकेय्या स्वपुत्राय भरताय दशरथात् भूमिः गृहीतेत्यस्यानुलोम्येन प्रतिपादकं, प्रातिलोम्येन रुक्मिणीपारिजातार्पणरूपेणापराधेन सत्यभामा कोपमवापेत्यर्थस्य प्रदर्शकं पद्यं निबध्नाति-

॥अ॥ सागसाभरतायेभमाभातामन्युमत्तया ।
सात्रमध्यमयातापेपोतायाधिगतारसा ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पदच्छेदः

सागसा भरताय इभमाभाता मन्युमत्तया ।
सा अत्र मध्यमया तापे पोताय अधिगता रसा ॥

अत्र अयोध्यायाम् **इभमाभाता** इभमा गजलक्ष्मीः तया भाता शोभिता **सा** प्रसिद्धा **रसा** पृथ्वी **मन्युमत्तया** कोपवत्वेन **तापे** स्वपुत्रराज्यालाभप्रयुक्ते सन्तापे सति **सागसा** सपापया रामस्य राज्यविघ्नरूपेण पापेन युक्तया । ''आगः पापापराधयोः'' इति विश्वः । **मध्यमया** दशरथस्य मध्यमभार्यया भरतजनन्या **पोताय** स्वपुत्राय **भरताय अधिगता** प्राप्ता । दशरथादिति शेषः ॥

శ్రీరామపట్టాభిషేకమునకు విఘ్నము కలిగించి, తన పుత్రుడైన భరతుని కొఱకు కైకేయి అయోధ్యానగర రాజ్యమును కోపముతో అసూయతో దశరథమహారాజు నుండి అపహరించెను.

In this Ayodhya, the earth (kingdom) was secured for her son (Bharata) by the middle (second of the three) queen, the jealous Kaikeyi.

प्रातिलोम्येन त्वित्थं पाठः --

॥प्र॥ सारतागधियातापोपेतायामध्यमत्रसा ।
यात्तमन्युमताभामा भयेतारभसागसा ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पदच्छेदः

सारतागधिया तापोपेता या मध्यमत्रसा ।
या आत्तमन्युमता भामा भयेता रभसागसा ॥

या मध्यमत्रसा मध्यमरूपः त्रसरेणुः यस्याः सा तथोक्ता अत्यल्पमध्येत्यर्थः । **या** सत्यभामा **सारतागधिया** सारतां श्रेष्ठतां गच्छतीति सारतागा । तादृश्या धिया श्रेष्ठत्वं प्राप्तया बुद्ध्या उपलक्षिता सा सत्यभामा **रभसागसा** रभसकृतेन अनालोच्य त्वरयैव कृतेन आगसा रुक्मिणीपारिजातार्पणरूपेण अपराधेन **आत्तमन्युमता** गृहीतकोपात्मकमता **भयेता** भयं प्राप्ता च सती **तापोपेता** सन्तापेन युक्ता बभूवेत्यर्थः ॥

సౌందర్యవతి, తన వైభవంతో శ్రేష్ఠత్వం పొందినది అయిన సత్యభామ శ్రీకృష్ణుడు రుక్మిణీదేవికి పారిజాతకుసుమము అర్పించెనని వినిన వెంటనే క్రోధోద్రిక్తురాలయ్యెను.

Satyabhama, the slender hipped, who attained a glorified position with her richness of wealth, became quickly possessed with anger and fear (due to the Parijatha given by Sri Krishna to Rukmani).

अथ कैकेयी रामस्याभिषेकं विघटय्य तस्मै काननप्रदा बभूवेत्यस्यार्थस्यानुलोम्येन प्रत्याययकं, प्रातिलोम्येन

In Public domain. Digitization Muthulakshmi Research Academy

सत्यभामाकोपातिशयप्रत्याययकं श्लोकं संग्रथ्नाति --

।।अ।। तानवादपकोमाभारामेकाननदाससा ।

यालतावृद्धसेवाकाकैकेयीमहदाहह ।। 10 ।।

पदच्छेदः

तानवात् अपका उमाभा रामे काननदा आस सा ।

या लता अवृद्धसेवाका कैकेयी महदा अहह ।।

उमाभा हरिद्राभा । "उमा स्यादतसीगौरीहरिद्राकीर्तिकान्तिषु" इति रत्नमाला । **अपका** अपगतसुखा **तानवात्** कार्श्यात् **लता** वल्ली सपत्नीपुत्राभिषेकजनितदुःखेन वल्लीवत् अतिकृशेत्यर्थः । **या कैकेयी अवृद्धसेवाका** वृद्धस्य दशरथस्य सेवा शुश्रूषा न विद्यते यस्याः सा तथोक्ता । यद्वा हितोपदिष्टमहत्सेवारहितेत्यर्थः । **सा** कैकेयी **महदा** सती महम् अभिषेकोत्सवं द्यति खण्डयतीति तथोक्ता । "मह उद्धव उत्सवः" इत्यमरः । **रामे काननदा** वनप्रदा **आस** बभूव । अहहेति खेदे ।।

సపత్నీపుత్రుడైన శ్రీరాముని పట్టాభిషేకవార్తతో దుఃఖించినదై తన దగ్గఱకు వచ్చిన దశరథునియందు అనాసక్తత కనబఱిచి, నిరసించిన కైకేయి శ్రీరాముని అరణ్యవాసమునకు పంపుటకు కారణమయ్యెను.

Kaikeyi, who became emaciated due to sorrow

In Public domain. Digitization Muthulakshmi Research Academy

at the thought of coronation and who had lost all pleasures and had ceased to attend on the comforts of the old King Dasaratha, objected to the coronation of Rama and made Rama proceed to the forest.

प्रातिलोम्येन पाठस्त्वेवम् --

।।प्र।। हहदाहमयीकेकैकावासेद्धवृतालया ।
सासदाननकामेराभामाकोपदवानता ॥ 10 ॥

पदच्छेदः

हह दाहमयी केकैकावासेद्धवृतालया ।
सा सदाननका आमेरा भामा कोपदवानता ॥

दाहमयी दाहप्रचुरा अत्यन्तसन्तापेत्यर्थः । **केकैकावासेद्धवृतालया** केकानां मयूराणाम् एकावासः मुख्यस्थानं इद्धः भास्वरः वृतः कवाटादिभिस्संवृतः आलयः गृहं यस्याः सा तथोक्ता । मयूरादिध्वनिमनोहरं भास्वरमपि मन्दिरं सखीप्रभृतीनामागमननिवृत्तये कुपितया सत्यभामया कवाटादिभिः पिहितमिति भावः । **सदाननकम्** आननमेव आननकं स्वार्थे क प्रत्ययः । सत् सुन्दरम् आननं मुखं यस्याः सा तथोक्ता **सा भामा** सत्यभामा **कोपदवानता** कोप एव दवः दावाग्निः तेन आनता सती **आमेरा** आमस्य रोगस्य इरा भूमिः स्थानभूता बभूवेति यावत् । "आमो रोगे रोगभेद" इति रत्नमाला । अत्र रोगवाचिशब्देन तत्कार्यभूतः

In Public domain. Digitization Muthulakshmi Research Academy

शोकः लक्ष्यते । **हहेति** खेदे ॥

పారిజాతపుష్పం రుక్మిణికిచ్చెనన్న వార్తతో అత్యంత దుఃఖితయైన సత్యభామ మయూరాదినృత్యముల మనోహర ధ్వనులతో నిత్యము నయనానందరకరముగా ఉండునట్టి తన భవనద్వారములు, కవాటములు బంధించుకొని, సఖురాళ్ళను కూడా అనుమతించనిదై కోపముతో దావాగ్ని వలె రగిలిపోవుచుండెను.

Satyabhama, who was exceedingly agitated, had bolted the doors to prevent entry of her maids into her abode, where the peacocks used to live and sport. The beautiful-faced Satyabhama was under the influence of grave anger, which was like the forest fire.

अथ पितृभक्त्या रामो वनं प्राप्तवानिति प्रदर्शयन्तमानुलोम्येन, प्रातिलोम्येन श्रीकृष्णः स्वकृतापराधनिबन्धनया भीत्या कुपितसत्यभामासान्त्वनार्थं तत्सदनं प्रापेत्येवमर्थं प्रदर्शयन्तं श्लोकम् आरचयति --

॥अ॥ वरमानदसत्यासह्नीतपित्रादरादहो ।
भास्वरस्थिरधीरोपहारोरावनगाम्यसौ ॥ 11 ॥

पदच्छेदः

वरमानदसत्याह्नीतपित्रादरात् अहो ।

In Public domain. Digitization Muthulakshmi Research Academy

भास्वरः स्थिरधीरः अपहारोराः वनगामी असौ ॥

भास्वरः प्रकाशमानः **स्थिरधीरः** निश्चलधैर्यः । महाशूर इत्यादौ महत्वं शौर्य इव स्थिरत्वं धैर्ये अन्वेतीति ध्येयम् । **असौ** रामचन्द्रः **वरमानदसत्यासह्नीतापित्रादरात्** वराणां श्रेष्ठानां मानदे पूजाप्रदे सत्यासः सत्यनिरसनम् । अस्यतेर्भावे घञ् । ततो ह्नीते लज्जिते पितरि दशरथे आदरात् भक्तितः अपहारोराः अपगतमुक्ताहारमुरः वक्षः यस्य स तथोक्तः । हारशब्दः आभरणान्तराणामपि प्रदर्शनार्थः । व्यपगतसर्वाभरणस्सन् इत्यर्थः । **वनगामी** काननं गतः बभूवेत्यर्थः । **अहो** आश्चर्यम् ॥

స్థిరచిత్తుడు, మహాపరాక్రమవంతుడూ అయిన శ్రీరాముడు పూర్వము కైకేయికి ఇచ్చిన వరములకు కట్టుబడి తన తండ్రి దశరథుడు లజ్జావనతముఖుడు కాగా తండ్రిని సత్యసంధునిగా నిలబెట్టుటకై ఆభరణములన్నింటిని వదిలి అడవికి వెళ్ళెను.

The glorious and courageous Rama, with great devotion to his revered father, who felt ashamed at discarding the valued truth, (Dasaratha's predicament in fulfilling his vow to Kaikeyi, resulting in the banishment of his beloved son to the forest) start to go the forest, bereft of all adornments.

In Public domain. Digitization Muthulakshmi Research Academy

प्रातिलोम्येन त्वेवं पाठः --

।।प्र।। सौम्यगानवरारोहापरोधीरस्स्थिरस्वभाः ।
होदरादत्रापितह्रीसत्यासदनमारवा ।। 11 ।।

पदच्छेदः

सौम्यगानवरारोहापरः धीरः स्थिरस्वभाः ।
हो दरात् अत्र आपितह्रीसत्यासदनम् आर वा ।।

अत्र द्वारकायां **सौम्यगानवरारोहापरः** सुन्दरगान-युक्तकान्तातत्परः **स्थिरस्वभाः** शाश्वतनिजतेजाः **धीरः** धैर्यवान् श्रीकृष्णः **आपितह्रीसत्यासदनं** सपत्नीपारिजातार्पणात् स्वेनैव प्रापितह्रीकायाः सत्यभामायाः सदनं गृहं **दरात् वा** भयादिव **आर** प्राप । ऋगतावित्यस्माल्लिट् । **हो** शिष्यसम्बुद्धिः । ''होहो चैवं विधौज्ञेयौ सम्बुध्यां वानयोरपि'' इति विश्वः । यद्वा हः दरात् इति पदच्छेदः । हः हरिरिति विशेष्यवाचकं पदम् । ''हः शङ्करे हरौ हंसे रणरोमाञ्चवाजिषु'' इति रत्नमाला । वा शब्दः इवार्थकः । ''वः प्रचेतसि जानीयात् इवार्थे च तदव्ययं'' इति मेदिनी । ''व वा यथा तथैवैवं साम्य'' इत्यमरश्च ।।

సుమధురగానామృతలాలసుడు, తేజః సంపన్నుడు, ధైర్యశాలియైన శ్రీకృష్ణుడు తాను పారిజాతమును రుక్మిణికిచ్చిన వార్త విని కినుక వహించిన సత్యభామా భవనమునకు భయముతో

In Public domain. Digitization Muthulakshmi Research Academy

వెళ్ళెను.

In Dwaraka, the brave Krishna, who was attached to his wife, endowed with a flair for music, who had been ashamed by his own action (of giving the flower of Rukmani) approached as if with fear the abode of Satyabhama.

अथानुलोम्येन जानक्याः रामभद्रेण सह वनप्राप्तिप्रत्याययकं, प्रातिलोम्येन कुपितायाः सत्यभामायास्सान्त्वनार्थं गतः कृष्णः नावलोकितः । एवम् अर्थं प्रदर्शयन्तं श्लोकम् आरचयति ---

॥अ॥ यानयानघधीतादा रसायास्तनयादवे ।
सागताहिवियाताह्रीसतापानकिलोनभा ॥ 12 ॥

पदच्छेदः

या नयानघधीतादा रसायाः तनया दवे ।
सा गता हि वियाता ह्रीसतापा न किल ऊनभा ॥

नयानघधीतादा नयेन शास्त्रेण अनघा अदोषा धीः बुद्धिः यस्य सः नयानघधीः तस्य भावः नयानघधीता तां ददातीति तथोक्ता। स्वाश्रितानां शास्त्रनिर्दोषबुद्धित्वप्रदा । **या रसायाः तनया** भूमेः पुत्री ह्रीसतापा ह्रिया लज्जया तापयुक्ता । नायकराज्यविघ्नलज्जासञ्जातविषादेत्यर्थः । **सा** सीता **वियाता**

In Public domain. Digitization Muthulakshmi Research Academy

धृष्टा सती **दवे** वने **गता** हि यातवती **हि**। "वनवन्यानलौ दावं दावो वैश्वानरे हय" इति रत्नमाला। तथापि **ऊनभा न किल** न्यूनकान्तिर्नासीत् किल। "स्युः प्रभा रुग्रुचिस्त्विड्भा-भाश्छविद्युतिदीप्तयः" इत्यमरः॥

తనను ఆశ్రయించిన వారికి నిర్దుష్టమైన శాస్త్ర జ్ఞానసంపదను ప్రసాదించునట్టి భూమిసుత సీతమ్మ శ్రీరామ పట్టాభిషేకభంగమునకు చింతించి ధైర్యముగా శ్రీరామునితో అరణ్యవాసమునకు వెళ్ళినను అమితమైన ఆమె తేజస్సునకు భంగము కలుగలేదు.

Sita, the daughter of Mother Earth, who bestows the gift of faultless knowledge of Sastras, to those who resort to her aid, became ashamed and agitated and entered the forest with great anger. Yet she did not lack lustre.

प्रातिलोम्येन पाठस्त्वेवम् ---

॥प्र॥ भानलोकिनपातासह्रीतायाविहितागसा।
वेदयानस्तयासारदाताधीघनयानया ॥ 12 ॥

पदच्छेदः

भान् अलोकि न पाता सः ह्रीता या विहितागसा।
वेदयानः तया सारदाता धीघनया अनया॥

In Public domain. Digitization Muthulakshmi Research Academy

या सत्यभामा **विहितागसा** विहितेन कृतेन आगसा सपत्न्यै पारिजातप्रदानरूपेण अपराधेन **ह्रीता** लज्जिता जाता **धीघनया** ज्ञानाधिकया **अनया** सत्यभामया तयाऽनयेति निर्देशः। सैषेतिवत्। **सारदाता** धनप्रदः। "न्याये च नीरे च धने च सारं" इति विश्वः। **भान्** प्रकाशमानः भादीप्तावस्य शारीरं रूपम्। **पाता** रक्षकः **सः वेदयानः** वेदात्मकं यानं यस्य स तथोक्तः गरुडवाहन इत्यर्थः। "सुपर्णोऽसि गरुत्मानि"त्याद्याः श्रुतयः। "वेदात्मा विहगेश्वरः" इत्याद्यभि-युक्तोक्तयश्च अत्र प्रमाणानि। **नालोकि** नावलोकितः ॥

నిరుపమానమైన కాంతితో ప్రకాశించువాడు, ధనదాత, గరుడవాహనుడూ అయిన శ్రీకృష్ణుడు రుక్మిణీదేవికి పారిజాత ప్రదానము చేసినందులకు కోపగించుకున్న సత్యభామా భవనమునకు వెళ్ళినను ఆమె కోపముతో శ్రీకృష్ణుని చూడకుండెను.

The resplendent Krishna, the protector and bestower of wealth, who had the celestial bird (Garuda) as his carrier, was not even looked at by Satyabhama, who was slighted by Krishna's fault (of giving the flower to Rukmani).

अथ भगवान् रामचन्द्रः सायासस्सन् वनं गच्छन् भरद्वाजं अन्यांश्च मुनीनासससादेत्यानुलोम्येन प्रत्याययन्तं, पूर्वं कुपिता

In Public domain. Digitization Muthulakshmi Research Academy

सत्यभामा कृष्णस्य वाक्यं न श्रुतवती न च स्वयं वाचमुवाच सैव कृष्णेन पारिजातानयनवाचि कथितायां भाषणं कृतवती इत्येतमर्थं प्रदर्शयन्तं प्रातिलोम्येन श्लोकमारचयति ---

।।अ।। रागिराधुतिगर्वादारदाहोमहसाहह ।
यानगातभरद्वाजमायासीदमगाहिनः ॥ 13 ॥

पदच्छेदः

रागिराधुतिगर्वादारदाहः महसा हह ।
यान् अगात भरद्वाजम् आयासी दमगाहिनः ॥

महसा तेजसा **रागिराधुतिगर्वादारदाहः** रागः अस्य अस्तीति रागि रं तीक्ष्णम् । "रः पावके च तीक्ष्णे चे" ति विश्व । आधुतिः खण्डनं तद्विषयो गर्वः तेन अदं क्षान्तिरहितं दा क्षान्तिः न विद्यते यस्य स तथोक्तम् । "दा स्त्रियां क्षान्तिदानयोः" इति रत्नमाला । ईदृशम् आरम् अरीणां समूहः आरं, "तस्य समूह" इत्यण् । तत् दहतीति आरदाहः रागदुष्टतीक्ष्णखण्डनदर्पयुक्ताक्षान्तिक-शत्रुसमूहभञ्जक इत्यर्थः । **यान्** गच्छन् अत एव **आयासी** आयासयुक्तः रामः **भरद्वाजं** मुनिं दमं गाहन्त इति **दमगाहिनः** दमवन्तो मुनयः तांश्च **अगात** उपासीदत् । **हहेति** खेदे ॥

దుష్టులు, తీక్ష్ణవంతులు, అహంకారయుతులు అయిన శత్రువులను అనేకమందిని నిర్మూలించిన శ్రీరాముడు, అలసట

In Public domain. Digitization Muthulakshmi Research Academy

పొందినవాడై భరద్వాజుడు మొదలగు మునులను దర్శించుటకు వెళ్ళెను.

Sri Rama, who vanquished the horde of wicked, proud and impassioned enemies, got tired while walking through the forest and approached the self-controlled Sage Bharadwaja.

प्रातिलोम्येन वचनप्रकारोऽयम् --

॥प्र॥ **नोहिगामदसीयामाजद्वारभतगानया ।**
हह साहमहोदारदार्वागतिधुरागिरा ॥ 13 ॥

पदच्छेदः

नो हि गाम् अदसीयाम् आजत् वा आरभत गाः न या ।
हह सा आह महोदारदार्वागतिधुरा गिरा ॥

या सत्यभामा **गाः** वाचः **नारभत** न उपाक्रमत कोपात् कृष्णेन सह सम्भाषणं नारब्धवतीत्यर्थः । **अदसीयां** कृष्णसंबन्धिनीं **गां** वाचं **नो आजद्वा** नाजानाद्वा । अजतेर्गत्यर्थतया ज्ञानार्थस्य लङ्- रूपमिदम् । **हिशब्दः** प्रसिद्धौ । कृष्णोक्तं वाक्यं न श्रुतवती चेत्यर्थः । **सा** तादृश्येव सत्यभामा **महोदारदार्वागतिधुरागिरा** महोदारदारुः पारिजातवृक्षः तस्य आगतिधुरागिरा आगमनभारवाचा पारिजातागमनभारो ममैवेति कृष्णवाक्येनेति यावत् । आगतेः धूः आगतिधुरा आगतिधुरायाः गीः

In Public domain. Digitization Muthulakshmi Research Academy

आगतिधुरागीरिति विग्रहः । आह सम्भाषणं कृतवतीत्यर्थः । हह आश्चर्यम् । या कृष्णेन सह सम्भाषणं न करोति, न च तदुक्तं शुश्राव सैव सत्यभामा पारिजातम् आनेष्यामि तदागमनभारम् अहमेव वहामि इति कृष्णोक्त्या प्रसन्ना तेन सह सम्भाषणं कृतवतीति भावः ॥

తనను అనునయించుటకు వచ్చిన శ్రీకృష్ణునితో కోపోద్రిక్తురాలైన సత్యభామ మొదట శ్రీకృష్ణునితో మాట్లాడక పోయినను "పారిజాత వృక్షమే" నీ కొఱకు తీసుకువచ్చెదననే శ్రీకృష్ణుని మాటలు విని ప్రసన్నురాలై ఆ దేవదేవుని ప్రేమతో పలుకరించెను.

Satyabhama did not utter a word to Sri Krishna out of anger nor did she listen to the utterances of Sri Krishna. But Satyabhama became immensely pleased with Sri Krishna when He told her that He would undertake the burden of bringing the great Parijatha tree and started to converse with Him.

अथ रामस्य चित्रकूटप्राप्तिम् आनुलोम्येन प्रदर्शयन्तं, कृष्णस्य पारिजातानयनार्थं स्वर्गगमनं प्रातिलोम्येन प्रदर्शयन्तं श्लोकं निबध्नाति ---

In Public domain. Digitization Muthulakshmi Research Academy

।।अ।। यातुराजिदभाभारं द्यां वमारुतगन्धगम् ।
सोगमारपदं यक्षतुङ्गाभोनघयात्रया ।। 14 ।।

पदच्छेदः

यातुराजिदभाभारं द्यां व मारुतगन्धगम् ।
सः अगम् आर पदं यक्षतुङ्गाभः अनघयात्रया ।।

यक्ष इव कुबेर इव **तुङ्गाभः** प्रौढ़दीप्तिः **सः** राघवः यातुराजिं राक्षसपङ्क्तिं द्यति खण्डयतीति **यातुराजिदः** तादृशो **भाभारः** तेजोभारः यस्य स तथोक्तः तं राक्षसादिविधूननक्षमतेजोऽतिशयशालिनमित्यर्थः । **मारुतगन्धगं** पवनसम्बन्धं प्राप्तं मन्दानिल शालिनमित्यर्थः । ''गन्धो गन्धगसम्बन्धामोदलेशस्मयेषु च'' इति रत्नमाला । **अगं** पर्वतं **स्थानं** चित्रकूटगिरिरूपं स्थानं **द्यां** स्वर्गमिव **अनघयात्रया** निर्दोषया गत्या ऋष्यनुगुणया प्राण्यन्तरपीडारहितया स्वचरणैकसाधनया गत्या **आर** गतवान् । ''यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे'' इति विश्वः । अत्र यक्षतुङ्गाभः इति द्यामिवेति च वचनात् ''सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः । यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने'' इति रामायणार्थस्सूचितः ।।

కుబేరునితో సమానమైన దీప్తిమంతుడు, దుష్టరాక్షసజాతి వినిర్మూలనంతో అత్యంతశక్తివంతుడూ అయిన శ్రీరాముడు ఇతర

In Public domain. Digitization Muthulakshmi Research Academy

ప్రాణులకు భీతి కలిగించనివాడై మందానిలంతో స్వర్గమును బోలిన చిత్రకూటపర్వతమునకు చేరెను.

Sri Rama who had valorous splendour like the Kubera and who had the distinction of vanquishing the big array of demons (Rakshasas), with his faultless gait, reached the region known as Chitrakuta, which was like the heaven, where the cool breeze was being wafted along.

प्रातिलोम्येन त्वित्थं पाठः --

।।प्र।। यात्रयाघनभोगातुं क्षयदं परमागसः ।
गन्धगन्तरुमावद्यां रम्भाभादजिरा तु या ।। 14 ।।

पदच्छेदः

यात्रया घनभः गातुं क्षयदं परमागसः ।
गन्धगं तरुम् आव द्यां रम्भाभादजिरा तु या ।।

घनभः मेघप्रभः कृष्णः **परमागसः** परमस्य आगसः अपराधस्य सत्यभामायै पारिजाताप्रदानरूपस्य **क्षयदं** शान्तिप्रदं **गन्धगं** गन्धं दिव्यामोदं प्राप्तं **तरुं** पारिजातवृक्षं **गातुं** गन्तुम् । गा गतावित्यस्मात् तुमुन् । **द्यां** स्वर्गं **यात्रया** प्रस्थानेन **आव** गतवान् । यात्रयेत्यनेन देशान्तरमिव लोकान्तरमपि सशरीर एव प्राप्तवानिति प्रदर्शितः । या द्यौस्तु **रम्भाभादजिरा** रम्भया भात् विराजत् अजिरम् अङ्कणं यस्याः सा तथोक्ता सत्यभामाविषये

In Public domain. Digitization Muthulakshmi Research Academy

स्वकृतापराधशान्तये पारिजातमाहर्तुकामः कृष्णः तमुपागन्तुं रम्भाद्यप्सरोभिः अलङ्कृताङ्गणं नाकं स्वरथं गरुडात्मकं तमारुह्य गतवानिति भावः ॥

నీలమేఘశ్యాముడైన శ్రీకృష్ణుడు సత్యభామను ప్రసన్నము చేసుకునే ప్రయత్నమున దివ్యమైన సుగంధము కలిగిన పారిజాత వృక్షమును తీసుకువచ్చుటకై రంభాది అప్సరలతో అలరారుతున్న స్వర్గలోకమునకు గరుడారూఢుడై బయల్దేరెను.

The cloud hued Sri Krishna, as an atonement to the displeasure caused to Satyabhama, started on a pilgrimage to the 'Swarga' – the heavenly abode of the God, which possessed an auditorium adorned by Rambha and others, to bring the Parijatha tree of divine pleasure.

अथानुलोम्येन रामस्य दण्डकावनप्राप्तिप्रतिपादकं, प्रातिलोम्येन कृष्णस्य नन्दनवनप्राप्तिप्रतिपादकं च पद्यं रचयति -

॥अ॥ दण्डकां प्रदमोराजाल्याहतामयकारिहा ।
ससमानवतानेनोभोग्याभोनतदासन ॥ 15 ॥

पदच्छेदः

दण्डकां प्रदमः राजाल्याः हतामयकारिहा ।
सः समानवतानेनोभोग्याभः न तदा आस न ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रदमः प्रकृष्टो दमः यस्य स तथोक्तः जितेन्द्रिय इत्यर्थः। राज्ञाम् आलिः **राजालिः** तस्याः क्षत्रियपङ्क्तेः **हतामयकारिहा** हतामयकः निर्धूतरोगः दृढगात्र इति यावत्। यः अरिः शत्रुः भृगुरामः तं हन्तीति पीडयतीति तथोक्तः। हननमत्र अवमतिकरणरूपं हिंसनं विवक्षितम्। क्षत्रियवर्गनिर्भञ्जन-निपुणभार्गवरामसामर्थ्यभञ्जक इत्यर्थः। **समानवतानेनोभोग्याभः** मानवता सहिताः समानवताः मनुष्यत्वयुक्ताः ये अनेनसः निष्पापाः तेषां भोग्या आभा दीप्तिः यस्य स तथोक्तः। नित्यसूरिभोग्योऽपि भगवान् निर्दोषमानुषभोग्यरूपो जात इति सौलभ्यं परस्य दर्शितम्। **सः** रामः **दण्डकां** दण्डकावनं तदा तत्काले **आस** गतवान्। द्वौ नञौ प्रकृतार्थं सूचयतः।

జితేంద్రియుడు, క్షత్రియకుల వినాశనముద్యుక్తుడైన పరశురాముని గర్వమును అణిచివేసినవాడు, జ్ఞానసంపన్నుల చేత మాత్రమే తెలుసుకోబడేవాడైనప్పటికిని మనుష్యావతారముతో సాధారణజనులకు కూడ చేరువైనవాడూ అయిన శ్రీరాముడు దండకారణ్యమున ప్రవేశించెను.

The self-controlled Rama, who had overcome Bhargavva Rama (Parsurama) the destroyer of the big like of Kshatriyas, reached the Dandaka forest, Rama, the Lord attainable only by the Nitrya Suris, by having taken the human forms also became attainable to the ordinary mortals of the world.

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिलोम्येन त्वेवं पाठः --

।।प्र।। नसदातनभोग्याभो नोनेतावनमास सः ।
हारिकायमताहल्याजारामोदप्रकाण्डदम् ।। 15 ।।

पदच्छेदः

न सदातनभोग्याभः नो नेता वनम् आस सः ।
हारिकायमताहल्याजारामोदप्रकाण्डदम् ।।

सदातनभोग्याभः नित्यभोग्या आभा यस्य स तथोक्तः । नित्यभोग्यदिव्यतेजस्क इत्यर्थः । **सः** नेता **नायकः** श्रीकृष्णः **हारिणा** मनोहारिणा **कायेन** देहेन **मतस्य** सम्मतस्य **अहल्याजारस्य** महेन्द्रस्य **आमोदप्रकाण्डदं** प्रशस्तानन्दप्रदम् । "प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनि" इत्यमरः । हारिकायमतेत्यहल्याया विशेषणम् । **वनं** नन्दनवनम् **आस** प्राप्तवान् ।।

నిత్యనూతన తేజఃసంపన్నుడు అసమాననాయకుడూ అయిన శ్రీకృష్ణుడు అహల్యను కపటముతో మోసం చేసిన మహేంద్రునికి సతతం మహానందం కలిగించే నందనవనం లోనికి ప్రవేశించెను.

The great leader, the possessor of remarkable magnificence, Sri Krishna, reached the Nandavana the celestial garden, which gave supreme pleasure to Indra.

In Public domain. Digitization Muthulakshmi Research Academy

अथानुलोम्येन रामस्य विराधहन्तृत्वम् अगस्त्यप्राप्तिं च प्रति-पादयितृकं, प्रातिलोम्येन कृष्णस्य नन्दनवनप्राप्त्यनन्तरं इन्द्रस्य भयसज्जननप्रदर्शकं पद्यं ग्रथ्नाति --

।।अ।। सोरमारदनज्ञानोवेदेराकण्ठकुम्भजम् ।
तं द्रुसारपटोनागानानादोषविराधहा ।। 16 ।।

पदच्छेदः

सः अरम् आरत् अनज्ञानः वेदेराकण्ठकुम्भजम् ।
तं द्रुसारपटः अनागाः नानादोषविराधहा ।।

द्रुसारः तरुत्वक् पटः यस्य सः **द्रुसारपटः** चीरवासाः **अनागाः** आगः अपराधः न विद्यते यस्य स तथोक्तः, सर्वत्रापि निरपराध इत्यर्थः । **अनज्ञानः** अज्ञानविरोधी **सः** रामः **नानादोष-विराधहा** सन् नानाविधाः दोषाः हिंसादयः यस्य सः तादृशं विराधाख्यं हतवान् सन् **तं** प्रसिद्धं **वेदेराकण्ठकुम्भजं** वेदेरा वेदवाक् । "इरा भूवाक्सुराप्सु स्यात्" इत्यमरः । सा कण्ठे यस्य सः वेदेराकण्ठः तादृशं वेदोक्तिपरिपूर्णकण्ठं कुम्भजम् अगस्त्यम् **अरं** शीघ्रम् **आरत्** प्राप्तवान् । मुनिवृत्तितया निरपराधः भजताम् अज्ञाननिरोधकः रामः निर्निमित्तहिंसाकारणं विराधं हत्वा शरभङ्गाद्याश्रमानतिक्रम्य मुनिषु प्रसिद्धं

In Public domain. Digitization Muthulakshmi Research Academy

वेदवाक्यालङ्कृतकण्ठम् अगस्त्यं तूर्णमेव प्राप्तवानिति भावः ॥

నారవస్త్రములు ధరించినవాడు, అపరాధరహితుడు, తనను ధ్యానించేవారి అజ్ఞానాన్ని పోగొట్టువాడు అయిన శ్రీరామచంద్రుడు ఎటువంటి కారణం లేకుండానే హింసను సృష్టించే విరాధుని సంహరించి, శరభంగాశ్రమమును దాటి వేదభూషితుడైన అగస్త్యముని ఆశ్రమమునకు వెళ్ళెను.

The faultless Rama, the enemy of ignorance, wearing the dress of bark, killed Viradha, the tormentor of all beings. Then Sri Rama went to Sage Agastya, whose voice was resounding with the Vedic hymns.

प्रातिलोम्येन पाठस्तु ---

॥प्र॥ हाधराविषदोनानागानाटोपरसाद्रुतम् ।
जम्भकुण्ठकरादेवेनोज्ञानदरमारसः ॥ 16 ॥

पदच्छेदः

हा धराविषदः नानागानाटोपरसात् द्रुतम् ।
जम्भकुण्ठकराः देवेनः अज्ञानदरम् आर सः ॥

धराविषदः धरायाः भूमेः विषदः जलप्रदः । इन्द्रस्य वृष्टिकारित्वात् गरलप्रद इत्यर्थः । तेन धरापालनप्रवृत्त-

In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णकर्तृकशिक्षार्हत्वं शक्रस्य युक्तम् इति ध्वन्यते । "विषं तु गरले जले" इति रत्नमाला । **नानागानाटोपरसात्** नानाविधसङ्गीताडम्बरजन्यं रसम् अत्ति अनुभवतीति तथोक्तः । विविधगन्धर्वस्वरसङ्गीतरसिक इत्यर्थः । **जम्भकुण्ठकराः** जम्भस्य तदाख्यस्य असुरस्य कुण्ठका भञ्जका राः सम्पत् यस्य स तथोक्तः । यद्वा रैशब्देन गतिरुच्यते । जम्भासुरनिरोधकसंगम इत्यर्थः । "रा स्त्रियां हेम्नि शालायाम् आशंसायां गतावपी" ति रत्नमाला । **सः** प्रसिद्धः **देवानाम्** इनः प्रभुः देवेन्द्रः **अज्ञानदरम्** अज्ञानं च दरं च इति समाहारद्वन्द्वः । अत एकवद्भावः क्लीबता च । मोहं भयं च **द्रुतं** क्षिप्रम् **आर** प्राप । **हा** कष्टम् । वर्षकमेघनियोजकः गन्धर्वादिसङ्गीतैः आमोदमानः जम्भाद्यसुरालम्भनसमर्थोऽपि देवेन्द्रः स्वर्गे कृष्णस्य आगमनं श्रुत्वा मूर्च्छितः द्रागेव भयमापेति कष्टमिति भावः ॥

వృష్టికారకుడు, గంధర్వాదుల స్వరసంగీతలోలుడు, జంభాసురుడు మొదలగువారిని వధించినవాడు అయిన దేవేంద్రుడు శ్రీకృష్ణపరమాత్మ స్వర్గలోకమున ప్రవేశించెనను వార్త విని భయకంపితుడయ్యెను.

Indra, the bestower of water to the earth and who was enjoying the pleasure of hearing different kinds of music and who possessed valour capable of vanquishing the asura (demon) named 'Jambha', got frightened on hearing the news

In Public domain. Digitization Muthulakshmi Research Academy

of arrival of Sri Krishna in the Swarga.

अथानुलोम्येन रामस्य गृध्रराजेन जटायुषा सेवितत्वं शूर्पणखायास्तत्र रतप्रार्थनं च, प्रातिलोम्येन तु शक्रस्य कृष्णविषयकापराधेन अपारदुःखप्राप्तिं पारिजातोत्पाटनेन नन्दनवनभञ्जकश्रीकृष्णाभिगमनं च प्रदर्शयन्तं श्लोकमाह ---

।।अ।। सागमाकरपाताहाकङ्केनावनतोहिसः ।
न समानर्दमारामालङ्काराजस्वसा रतम् ।। 17 ।।

पदच्छेदः

सागमाकरपाता हा कङ्केन अवनतः हि सः ।
न समानर्द मा अरामा लङ्काराजस्वसा रतम् ।।

सागमाकरपाता आगमेन सहिताः सागमाः वेदविदः महर्षयः तेषाम् आकरः समूहः तस्य पाता रक्षिता । "आकरस्थानखन्यौ वा" इति रत्नमाला । **सः** रामचन्द्रः कङ्केन गृध्रेण जटायुषा **अवनतो** हि सेवितः किल । अगस्त्याश्रमात् निर्गत्य दण्डकावनतपोधनरक्षको रामभद्रः पञ्चवट्यां जटायुषा मानितः अभूदिति भावः । तदानीम् **अरामा** अमनोज्ञा । "रामः पशावित्यधिकृत्य सितासितमनोज्ञेषु" इति रत्नमाला । **लङ्काराजस्वसा** लङ्काराजः रावणः तस्य स्वसा शूर्पणखा ।

In Public domain. Digitization Muthulakshmi Research Academy

लङ्काराज इति षष्ठ्यन्तं पृथक्पदं वा । **रतं** सम्भोगं **समानर्द** सम्यक् आनर्द ययाचे । **न** मा इति निषेधौ प्रकृतमर्थं दृढयतः ॥

అగస్త్యాశ్రమము నుండి బయల్దేరి దండకారణ్యములో ప్రవేశించి అక్కడ వేదవిదులైన మహర్షులకు రక్షణ కల్పించి, పంచవటియందు జటాయువుయొక్క సేవను అంగీకరించిన పిమ్మట ముందుకు సాగుతున్న శ్రీరాముని చూచి రావణసోదరి, కురూపి అయిన శూర్పణఖ మోహించెను.

Sri Rama, the protector of the sages immersed in the lore of the Vedas, was adored by Jatayu, Sri Rama was then implored by Surpanaka, the ugly sister of Ravana for his union.

प्रातिलोम्येन त्वित्थं पाठः ---

॥प्र॥ तं रसास्वजराकालंमारामार्दनमासन ।
सहितोनवनाकेकं हातापारकमागसा ॥ 17 ॥

पदच्छेदः

तं रसासु अजराकालं मा आरामार्दनम् आस न ।
सः हितः अनवनाके अकं हाता अपारकम् आगसा ॥

अनवे चिरन्तने **नाके** स्वर्गेऽपि **अपारकम्** अपारम् । स्वार्थे क- प्रत्ययः । अकं दुःखम् । ''अकं पापे च दुःखे'' ति

In Public domain. Digitization Muthulakshmi Research Academy

विश्वः । **हाता** प्राप्तः । **हा** गतावित्यस्मात् तृन् । **सः** इन्द्रः **रसासु** भूमिषु **अजराकालं** जराकालौ जरामरणे न विद्येते यस्य स तथोक्तः। "कालो नेहा यमो मृत्युरि" ति रत्नमाला । भूमौ अवतीर्णस्यापि हि हरेः जरामराणादि- विकारा न सन्ति । "विजरो विमृत्युरि" ति श्रुतेः । आरामार्दनम् आरामस्य नन्दनवनस्य **अर्दनं** पारिजातोत्पाटनेन भञ्जकं **तं** श्रीकृष्णम् **आर** प्राप्तवान् । पूर्वं हरेः मित्रभूतोऽपि शक्रः तत्प्रार्थितपारिजा-ताप्रदानरूपेणापराधेन नाकेऽपि निरवधिकं दुःखं प्राप्य पारिजातोत्पाटनेन नन्दनवनभञ्जकम् अवताररूपेष्वपि जरामरणादिविकारदूरं शौरिं योद्धुकामः प्राप्तवानिति भावः ॥

తాను కోరిన పారిజాతవృక్షమిచ్చుటకు ఇంద్రుడు అంగీకరింపకపోవుట వలన శ్రీకృష్ణుడు క్రోధముతో ఆ పారిజాత వృక్షమునె పెకిలించి తీసుకువెళ్ళుచుండెను. దానితో కోపోద్రిక్తుడైన ఇంద్రుడు పూర్వము శ్రీహరితో మిత్రుత్వమున్న-వాడే అయినప్పటికిని ఆ దేవదేవునితో యుద్ధము చేయుటకుద్యుక్తుడయ్యెను.

Lord Sri Krishna uprooted the Parijatha tree on Indra's refusal to part with it. Consequently, Indra, though a friend of Krishna, made up his mind to fight with him.

In Public domain. Digitization Muthulakshmi Research Academy

अथानुलोम्येन शूर्पणखानासिकाच्छेदस्य तस्याः राघवे वैरानुबन्धस्य च प्रतिपादकं, प्रातिलोम्येन च शक्रस्य केशवसम्भाषणारम्भ-प्रतिपादकं श्लोकमारचयति ---

।।अ।। तां स गोरमदोश्रीदो विग्रामसदरोतत ।
वैरमासपलाहारा विनासा रविवंशके ।। 18 ।।

पदच्छेदः

तां सः गोरमदोश्रीदः विग्राम् असदरः अतत ।
वैरम् आस पलाहारा विनासा रविवंशके ।।

गोरमदोश्रीदः गोरमः भूरमणः रामचन्द्रः तस्य दोष्णोः बाह्वोः श्रीदः सम्पत्प्रदः । बाहुबलप्रदः सहाय इति यावत् । ''रामस्य दक्षिणो बाहुः'' इति रामायणम् । **सः** लक्ष्मणः सदरः सभयः न भवतीति **असदरः** निर्भयस्सन् **तां** शूर्पणखां **विग्रां** विगतनासिकाम् **अतत** अकृत । ततः **पलाहारा** मांसाहारा राक्षसी **विनासा** विगतनासिका सती रवेः वंशो यस्य सः **रविवंशकः** तस्मिन् सूर्यवंशभवे रामे **वैरं** द्वेषम् आस आददे । सम्भोगार्थिनीं शूर्पणखां श्रीरामसहायभूतो लक्ष्मणः निर्भयस्सन् तां शूर्पणखां विगतनासिकाम् अकरोत् । तेन नासाहीना कुपिता राक्षसी रामे वैरानुबन्धं कृतवतीति भावः ।।

In Public domain. Digitization Muthulakshmi Research Academy

శ్రీరామచంద్రుని సంభోగము కోటిన శూర్పణఖను చూచి క్రోధముతో శ్రీరామునికి కుడి భుజమైన లక్ష్మణుడు నిర్భయముగా ఆమె ముక్కును కోసివేసెను. అప్పుడు ఛేదింపబడిన ముక్కుగల శూర్పణఖ శ్రీరామునితో వైరము పెంచుకొనెను.

Lakshmana, the lieutenant and aid of Sri Rama, and the dauntless, cut the nose of Surpanaka. The demonic Surpanaka, who had lost her nose, vowed vengeance on Rama, the descendant of the God Sun.

प्रातिलोम्येन पाठस्त्वेवम् --

।।प्र।। केशवं विरसानाविराहालापसमारवैः ।
ततरोदसमग्राविदोश्रीदोमरगोसताम् ।। 18 ।।

पदच्छेदः

केशवं विरसानाविः आह आलापसमारवैः ।
ततरोदसम् अग्राविदः अश्रीदः अमरगः असताम् ।।

विरसानाविः रसः आनन्दः आनः प्राणनं बलं अविः कान्तिः विगताः रसानावयः आनन्दबलकान्तयः यस्य स तथोक्तः । **असताम्** असुराणाम् **अश्रीदः** अलक्ष्मीप्रदः अमरान् गच्छतीति अमरगः देवैर्युक्त इति भावः । **अग्राविदः** अग्रभूताः अवयः पर्वताः तान् द्यति खण्डयतीति तथोक्तः पर्वतच्छेदी शक्रः ।

In Public domain. Digitization Muthulakshmi Research Academy

"अग्रंपुरः शिखामानश्रेष्ठाधिकफलादिषु" इति रत्नमाला । **ततरोदसं** तते कृते रोदसी द्यावापृथिव्यौ येन स तथोक्तः ततरोदसं द्यावापृथिव्यादिस्रष्टारम् । "द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी" त्यमरः । "यथापूर्वमकल्पयत् दिवं च पृथिवीञ्चान्तरिक्षमथो सुवः" इति श्रुतिः । **केशवं** कृष्णम् **आलापसमारवैः** समीचीनैः शब्दैः सान्त्ववचनैरिति यावत् । तैर्युक्तस्सन् **आह** ब्रवीति स्म । असुरविषादकरः देवैर्युक्तोऽपि गोत्रभित् पारिजाताभिलाषप्रबद्धकृष्णस्पर्धया विगतानन्दबलदीप्तिकस्सन् अखिललोकस्रष्टारं कृष्णम् अनुरूपसान्त्वशब्दोक्तिपूर्वकं समवोचदिति भावः ॥

అసురులందరికి విషాదం కలిగించువాడు, దేవతలంతా సహాయకులుగా గలవాడు 'గోత్రభిద్' గా ప్రసిద్ధిపొందినవాడూ అయిన ఇంద్రుడు తనపై శ్రీకృష్ణునకు కలిగిన కోపముతో తన శౌర్యము, బలము, ఆనందము అన్నిము కోల్పోయినవాడై పశ్చాత్తాపమునొంది సకలలోకస్రష్టయైన శ్రీకృష్ణునితో శాంతి వచనములు పలికెను.

Indra, who overwhelmed the Asuras, and who was surrounded by the Gods and who had smothered the mountains, and who had his splendour and valour slighted, addressed Sri Krishna with polite words.

In Public domain. Digitization Muthulakshmi Research Academy

अथानुलोम्येन राघवस्य खरसेनया युद्धप्राप्तिं खरवधेन शोभमानत्वं तेन सकललोकव्यापिकीर्तिमत्वं च प्रदर्शयन्तं, प्रातिलोम्येन दिव्यस्य पारिजातस्य अनुचितं भूतलानयनं मा कुर्वित्येतमर्थं प्रतिपादयन्तं श्लोकमारचयति --

।।अ।। गोद्युगोमस्वमायोभूदश्रीगखरसेनया ।
सहसाहवधारोविकलोराजदरातिहा ।। 19 ।।

पदच्छेदः

गोद्युगोमः स्वमायः अभूत् अश्रीगखरसेनया ।
सह साहवधारः अविकलः अराजत् अरातिहा ।।

अश्रीगखरसेनया अश्रीगः अलक्ष्मीं गतः यः खरः तन्नामको राक्षसः तस्य सेनया **सह** समं **साहवधारः** आहवधारया युद्धधारया सहितः । अविच्छिन्नयुद्धयुक्तः । तथापि **अविकलः** वैकल्यरहितः **स्वमायः** अमायः अदम्भः शोभना अमाया यस्य सः स्वमायः ।''माया दम्भे क्रियायां च'' इति रत्नमाला । ईदृशः रामः **अरातिहा** खरदूषणादिशत्रुहन्ता सन् **अराजत्** प्रचकाशे । ततः **गोद्युगोमः** गौश्च द्यौश्च गोद्यावौ गौः पृथिवी द्यौः स्वर्गः द्यावापृथिव्यौ गच्छतीति व्याप्नोतीति गोद्युगा उमा कीर्तिः यस्य सः गोद्युगोमः । ''उमा स्यादतसीगौरी हरिद्राकीर्तिकान्तिषु'' इति रत्नमाला । **अभूत्** आसीत् । खरसेनया समम् अविच्छिन्नसमरं

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वाऽपि अखण्डितगात्रः खरादीन् हत्वा रामो रराज । तेन चतुर्दशसंख्यखरादिराक्षसवधेन सकललोक-कीर्तिपात्रमासीदिति भावः ॥

ఖరుడనే రాక్షసునితో ఆతని సైన్యముతో భీకరయుద్ధము చేసి వారిని తుదముట్టించిన శ్రీరాముని కీర్తిప్రతిష్ఠలు ద్యావాపృథివిలయందంతటయు పరివ్యాప్తమయ్యెను. ఘోరమైన యుద్ధము చేసినప్పటికిని శ్రీరాముడు ఎటువంటి వైకల్యము పొందలేదు కాని ఖరదూషణులను మాత్రము సంహరించెను.

Though Sri Rama destroyed the demon 'Khara' and his army after a bitter fight, he was unostentatious and remained unscathed. His fame spread far and wide (reached the farthest corners of the earth and the heaven).

प्रातिलोम्येन त्वित्थं पाठः --

॥प्र॥ हातिरादजरालोकविरोधावहसाहस ।
यानसेरखगश्रीद भूयोमास्वमगोद्युगः ॥ 19 ॥

पदच्छेदः

हा अतिरादजरालोकविरोधावहसाहस ।
यानसेरखग श्रीद भूयः मा स्वम् अगः द्युगः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अतिरादः अत्यन्तं रादः दातारः **ये अजरा** निर्जराः देवाः तेषाम् **आलोकः** तेजः **तद्विरोधावहं** तद्विघातावहं **साहसं** यस्य स तथोक्तः तत्र सम्बुद्धिः । कर्मफलदातृणां देवानां तेजोभङ्गकरसाहसयुक्तः इत्यर्थः । **यानसेरखग** इरया वाचा वेदवाचासहितः सेरः वेदमयः खगः गरुत्मान् यानभूतो वाहनभूतः सेरः खगः यस्य स तथोक्तः तस्य सम्बुद्धिः । **श्रीद** सम्पत्प्रद हे कृष्ण **स्वं** धनभूतः **द्युगः** नाकगतः **अगः** वृक्षः पारिजातवृक्षः भुवं यातीति **भूयः** भूलोकगतो **माभूत्** । देवतेजोभङ्गकारिपराक्रम, गरुडवाहन, सम्पत्प्रद, कृष्ण ! नाकस्थपारिजातं भूलोकं मानैषीः इति भावः । हेति खेदे ॥

దేవతలపరాక్రమమును ఛేదింపగలశక్తి గలవాడా ! గరుడవాహనుడా ! సకలసంపదలనిచ్చువాడా ! ఓ శ్రీకృష్ణా ! స్వర్గలోకపు పారిజాతవృక్షమును భూలోకమునకు తీసుకువెళ్ళవద్దని మహేంద్రుడు ప్రార్థించెను.

'Oh ! Sri Krishna ! Possessor of prowess capable of destroying the valour of the Gods, You who have celestial bird (Garuda) as your conveyance; dispenser of wealth, please do not carry the celestial tree Parijatha to the earth.'

अथानुलोम्येन रघुनन्दने लङ्केश्वरस्य

In Public domain. Digitization Muthulakshmi Research Academy

विजिगीषाहङ्कारप्रतिपादकं, प्रातिलोम्येन प्रथमं शोकार्णवे निपतितस्यापि महेन्द्रस्य ततः धैर्यात् जयन्तादीन् प्रति पारिजातापहारिणं कृष्णं गृह्णीध्वमित्यादेशं प्रदर्शयन्तं श्लोकमाह-

।।अ।। हतपापचयेहेयो लङ्केशोयमसारधीः ।
राजिराविरतेरापोहाहाहङ्ग्रहमारघः ॥ 20 ॥

पदच्छेदः

हतपापचये हेयः लङ्केशः अयम् असारधीः ।
राजि राविरतोरापः हाहा अहङ्ग्रहम् आर घः ॥

राविरतेरापः अविरतं सन्ततम् इरां सुरां पिबन्तीति अविरतेरापाः राः तीक्ष्णाः अविरतेरापाः राक्षसाः यस्य स तथोक्तः । "रः पावके च तीक्ष्णे चे" ति विश्वः । **घः** घोरः । "घोरे तु घस्त्रिष्वि" ति रत्नमाला । **असारधीः** निस्सारबुद्धिः हेयः कुत्स्यः **अयं** लङ्केशः रावणः **हतपापचये** पापानां खरादीनां राक्षसानां च यो गणः हतो येन स तथोक्तः । तस्मिन् **राजि** राजनि रामचन्द्रे । राट् शब्दोऽयम् । **अहङ्ग्रहम्** अहम्बुद्धिं जेष्यामीत्याग्रहम् **आर** प्राप ॥

నిరంతరము సురాపానము చేసెడి దుష్టరాక్షసుల సమూహముతో నుండువాడు, హేయమైన బుద్ధికలవాడు అయిన రావణాసురుడు ఖరదూషణాది రాక్షసులందరిని సంహరించిన

In Public domain. Digitization Muthulakshmi Research Academy

శ్రీరామునితో యుద్ధముచేసి జయముపొందవలెనని నిశ్చయించుకొనెను.

Ravana, the Lord of Lanka, who was surrounded by Rakshasas, the wicked and mean, made up his mind to conquer Sri Rama, who had destroyed the horde of demons.

प्रातिलोम्येन पाठस्तु ---

।।प्र।। घोरमाहग्रहंहाहापोरातेरविराजिराः ।
धीरसामयशोकेलं यो हेये च पपात ह ।। 20 ।।

पदच्छेदः

घोरम् आह ग्रहं हाहापः अरातेः रविराजिराः ।
धीरसामयशोके अलं यः हेये च पपात ह ।।

रविराजिराः रविरिव सूर्य इव राजते शोभते इति तादृशी राः सुवर्णः यस्य स तथोक्तः । सूर्यप्रकाशभूषणादिरूपसुवर्णशालीत्यर्थः । **यः हाहापः** हाहाशब्दः हूहूप्रभृति सवगन्धर्वोपलक्षणार्थकः । हाहां पाति रक्षतीति हाहापः इन्द्रः **हेये** कुत्स्ये **धीरसस्य** ज्ञानानन्दस्य **आमयभूते** व्याधिभूते **शोके** दुःखे पारिजातापहारजन्ये **अलम्** अत्यन्तं **पपात** । **ह इति** प्रसिद्धौ । चकारः उभयसमुच्चयार्थः । सः इन्द्रः **घोरं** भयङ्करम् **अरातेः**

In Public domain. Digitization Muthulakshmi Research Academy

कृष्णस्य ग्रहणम् **आह** उवाच । जयन्तादीन् प्रतीति शेषः ॥

సూర్యునివంటి తేజస్సు కలిగిన ఇంద్రుడు శ్రీకృష్ణ పరమాత్మ పారిజాతమును తీసుకువెళ్ళుటవలన దుఃఖితుడై వెంటనే శ్రీకృష్ణునిపై దండెత్తమని జయంతాదులను ఆదేశించెను.

Indra, the Lord of the Gandharvas and who was shining just like the God Sun, became afflicted with sorrow the sorrow, which has the sickening effect of blunting the sense of discretion and ordered the capture of Sri Krishna.

अथानुलोम्येन रामस्य मारीचवधेन शोभमानत्वं बोधयत् सीतायाः लक्ष्मणसहायरहितस्थानवासित्वञ्च प्रतिपादयत् , प्रातिलोम्येन पारिजातं हृत्वा स्वर्गे सञ्चरता प्रद्युम्नयुक्तेन कृष्णेन सह इन्द्रस्य सञ्चाराक्षमताञ्च प्रतिपादयत् पद्यमाह ---

॥अ॥ ताटकेयलवादेनोहारीहारिगिरासस: ।
हासहायजनासीतानाप्तेनादमनाभुवि ॥ 21 ॥

पदच्छेदः

ताटकेयलवात् एनोहारी हारिगिरा आस सः ।
हा असहायजना सीता अनाप्तेना अदमनाः भुवि ॥

हारिण्या मनोहारिण्या **गिरा** स्वनामरूपया वाचा **एनोहारी**

In Public domain. Digitization Muthulakshmi Research Academy

पापहरः । रामनामोच्चारणेन रामस्य तदुच्चारयितृपापहरत्वं हि प्रसिद्धम् । **सः** रामः **ताटकेयलवात्** ताटकेयस्य मारीचस्य लवात् च्छेदात् आस दिदीपे । ''लवो रामसुते लेशे च्छेदनेऽपि च'' इति रत्नमाला । अनन्तरं **भुवि** स्वस्थाने **अनाप्तेना** अनाप्तः अप्राप्तः इनः नाथः यया सा तथोक्ता स्वस्थाने रामसन्निधानरहितेत्यर्थः । **अदमनाः** अदं क्षान्तिरहितं मनः यस्याः सा तथोक्ता । हन्यमानमारीचशब्दे काकुत्स्थार्तिध्वनित्वभ्रान्त्या तच्छ्रवणमसहमानेत्यर्थः । ''दा स्त्रियां क्षान्तिदानयोः '' इति रत्नमाला । **सीता असहायजना** सहायजनरहितेत्यर्थः । जातेत्यर्थः । **हा** शब्दः एकाकिन्याः विजने वने अवस्थानम् अनुचितमिति द्योतयति ॥

రామ అనే అక్షరద్వయోచ్చారణతోనే సర్వపాపములను హరించివేసే శ్రీరాముడు తాటకాసుతుడైన మారీచుని వధించి అమితముగా ప్రకాశించెను కాని కపట వేషధారియైన మారీచుడు శ్రీరాముని కంఠస్వరముతో చేసిన హాహాకారమును విని సీతమ్మ అసహాయురాలై దుఃఖించెను. (లక్ష్మణుని శ్రీరామరక్షణకై పంపిన సీత అసహాయురాలయ్యెను.)

In Public domain. Digitization Muthulakshmi Research Academy

Sri Rama, the utterance of whose name makes one rid of all sins, shone brilliantly by killing Maricha, the son of Tataka. Sita, without her Lord, lost her composure and became protectorless (destitute).

प्रतिलोमपाठस्तु ---

।।प्र।। विभुनामदनाप्तेनातासीनाजयहासहा ।
ससरागिरिहारीहानोदेवालयकेटता ।। 21 ।।

पदच्छेदः

विभुना मदनाप्तेन आत आसीनाजयहासहा ।
सः सराः गिरिहारी हा नो देवालयके अटता ।।

आसीनाजयहासहा आसीनः स्ववाहने उपविष्टः अजयः जयस्य जयन्तस्य विरोधी प्रद्युम्नः ''जयो जयन्ते विजये जया दुर्गाग्निमन्थ्ययोः'' इति विश्वः । तस्य हासं युद्धाट्टहासं हन्तीति आसीनाजयहासहा वाहरूढजयन्तप्रतिस्पर्धिप्रद्युम्नरणाट्टहासं शरवर्षेण निराकृतवानित्यर्थः । सराः ससम्पत्कः **गिरिहारी** गिरीन् पर्वतादीन् हरति प्रहरतीति तथोक्तः स्वर्गं प्रदक्षिणीकुर्वता **मदनाप्तेन** प्रद्युम्नाश्रितेन **विभुना** श्रीकृष्णेन सह नो आत नातति स्म । अत सातत्यगमने इत्यस्माल्लिट् । गिरिपक्षच्छेदकोऽपि

In Public domain. Digitization Muthulakshmi Research Academy

जयन्तजित्प्रद्युम्नाट्टहासनिवारकोऽपि शक्रः स्वर्गं परितः सञ्चरन्तं प्रद्युम्नाश्रितं श्रीकृष्णम् अनुगन्तुं शक्तो नाभूत् इति भावः ॥

పర్వతరాజముల రెక్కలు ఛేదించినవాడు జయంతుని ఓడించిన ప్రద్యుమ్నుని యొక్క అట్టహాసమును నివారించినవాడూ అయినప్పటికి మహేంద్రుడు పారిజాతమును తీసుకుని స్వర్గలోకమంతటా సంచరించుచున్న శ్రీకృష్ణుని తెలుసుకోలేక పోయెను.

Indra, who could destroy the wings of the mountains and could overcome Pradyumna, with the rain of his arrows, could not follow Sri Krishna, who accompanied by Pradumna, was wandering around the abode of Gods, the Swarga.

अथानुलोम्येन रावणेन सीता हृतेति प्रतिपादयन्तं, प्रातिलोम्येन स्वमित्रभूतप्रवराख्यब्राह्मणाप्यायिततेजसा शक्रेण प्रद्युम्नतेजोभङ्गः कृत इति प्रदर्शयन्तं श्लोकमाह --

॥अ॥ भारमाकुदशाकेनाशराधीकुहकेनहा ।
चारुधीवनपालोक्या वैदेहीमहिताहृता ॥ 22 ॥

पदच्छेदः

भारमा कुदशाकेन आशराधीकुहकेन हा ।

In Public domain. Digitization Muthulakshmi Research Academy

चारुधीवनपालोक्या वैदेही महिता हृता ॥

भारमा भासा लक्ष्मीः सीतायाः लक्ष्म्यभेदेऽपि मानुषावतारत्वम् अवलम्ब्य भेदव्यपदेशः । रामस्य विष्ण्वभेदेऽपि ''विष्णुना सदृशो वीर्ये'' इति भेदव्यपदेशवत् । **चारुधीवनपालोक्या** चारुधियः सुबुद्धयः ये वनपाः वनरक्षकाः देवाः तैः आलोक्या अवलोकितुं योग्या । वनदेवतामात्रसाक्षिकेति यावत् । **महिता** पूजिता **वैदेही** जानकी **कुदशाकेन** कुत्सितावस्थाकेन सीताहरणोद्योगात् आयुषः क्षयदुर्दशा जातेति भावः । **आशराधीकुहकेन** आशरेण राक्षसरूपेण अधीकुहकेन अबुद्धिना वञ्चकेन । ''क्रव्यादोऽसृक्प आशरः'' इत्यमरः । वञ्चनार्थं सन्न्यासिरूपं धृतवता रावणेन **हृता** गृहीता । **हा** कष्टम् ॥

సాక్షాత్తూ లక్ష్మీదేవి అవతారమూర్తి అయినట్టి, వనదేవతలే రక్షకులుగా కలిగినట్టి, మాననీయురాలైన వైదేహి కపట వేషధారియైన రావణాసురునిచే అపహరింపబడెను.

The adorable Vaidehi (Sita), who was an incarnation of Goddess Lakshmi, was carried away by the deceitful and mean-minded Ravana.

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिलोमपाठस्तु ---

।।प्र।। ताहताहिमहीदेवैक्यालोपानवधीरुचा ।
हानकेहकुधीराशनाकेशादकुमारभाः ।। 22 ।।

पदच्छेदः

ताः हताः हि महीदेवैक्यालोपानवधीरुचा ।
हानकेहकुधीराशनाकेशा अदकुमारभाः ।।

महीदेवस्य मित्रभूतस्य प्रवराख्यस्य ब्राह्मणस्य **ऐक्येन** सौहार्देन । रामसुग्रीवयोरैक्यमितिवत् । **अलोपे** नाशरहिते **अनवधीरुचौ** चिरन्तन प्रज्ञातेजसी यस्य स तथोक्तः तेन । इन्द्रस्य सखा कश्चित् प्रवरनामा ब्राह्मणः समागत्य श्रीकृष्णशरघातविषण्णस्य शक्रस्य यथा निस्सञ्ज्ञता निस्तेजस्कत्वं च न भवति तथा स्वयं साहाय्यकम् आचरितवानिति हरिवंशे प्रसिद्धम् । **हानकेहकुधीराशनाकेशा** हानमेव हानकं युद्धत्यागः तस्मिन् ईहा इच्छा येषां ते तथोक्ताः तादृशाः ये कुधीराः धीराभासाः तेषु आशा रक्षणेच्छा यस्य स तथोक्तः तेन नाकेशा स्वर्गनाथेन शक्रेण । ईट् शब्दोऽयं तृतीयान्तः । शरघातभीत्या युद्धं त्यक्त्वा पलायनोद्युक्तानां कुत्सितधैर्यबलवतां देवानां रक्षणं चिकीर्षता स्वर्गेश्वरेणेत्यर्थः । **ताः** प्रसिद्धाः **अदकुमारभाः** अदस्य क्षान्तिरहितस्य कुमारस्य प्रद्युम्नस्य भाः दीप्तयः **हता हि** अपहृताः खलु ।।

In Public domain. Digitization Muthulakshmi Research Academy

(శ్రీకృష్ణుని శరాఘాతములతో విషణ్ణుడైన ఇంద్రునికి ఆతని మిత్రుడైన ప్రవరాఖ్యుడనే విప్రుడు ఉపశమనం కలిగించెనని హరివంశపురాణంలో ప్రసిద్ధి) ఇప్పుడు యుద్ధమునుండి పారిపోవుతున్న దేవతలకు ధైర్యము చెప్పిన మహేంద్రుడు ప్రవరాఖ్యుని సహాయముతో ప్రద్యుమ్నుని ఓడించెను.

Pradyumna was defeated by Indra, who was desirous of protecting the frightened and fleeing Gods and who was aided by the Brahmin named Pravara. (Pradyumna fell down unconscious.)

अथानुलोम्येन रामचन्द्रस्य सीतावियोगिनः हनुमत्समागमं सुग्रीवस्य राज्यभ्रष्टस्य दुर्बलस्य रामप्राप्तिं च दर्शयन्तं, प्रातिलोम्येन च शक्रेण युधि तेजोभङ्गं प्रापितस्य प्रद्युम्नस्य पुनः क्षणादेव तेजोलाभं शत्रुघातित्वं च प्राप्तवतः शरघातश्रमहरशीतवातशालिनभोदेशाकलनं च प्रतिपादयन्तं श्लोकमाह --

।।अ।। हारितोयदभोरामावियोगेनघवायुजः ।
तंरुमामहितोपेतामोदोसारज्ञरामयः ।। 23 ।।

पदच्छेदः

